CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

THE

PRINCESS OF WALES

SARASWATI BHAVANA TEXTS.

No. 21

(Part I)

THE

NYĀYA SIDDHĀNTA MĀLĀ

GOVERNMENT SANSKRIT LIBRARY,

BENARES.

1927.

Sa. SHA 1182

ple at half of the printed price.

Price, Re. 1-2-0.]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

1182

SHA

341

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

THE

PRINCESS OF WALES

SARASWATI BHAVANA TEXTS

No. 21

(PART I)

EDITED BY

GOPĪ NĀTHA KAVIRĀJA

THE

NYĀYA SIDDHĀNTA MĀLĀ



Printed by

JAI KRISHNA DASS GUPTA,

at the Vidya Vilas Press,

Gopal Mandir Lane,

Benares City.

1927.

Saleable at half of the printed price.



CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न्यायसिद्धान्तमाला

THE

NYĀYA SIDDHĀNTA MĀLĀ

OF

JAYARĀMA NYĀYA-PAÑCĀNANA BHAṬṬĀCĀRYA

EDITED WITH INTRODUCTION ETC.

By

MANGAL DEVA SHASTRI,
M. A., D. PHIL. (OXON.)

LIBRARIAN,
GOVERNMENT SANSKRIT LIBRARY,
SARASVATĪ BHAVANA, BENARES.

1927

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

PREFATORY NOTE.

The present edition, which is also the first edition, of the Nyāya-siddhānta-mālā was originally plannad to be based upon a single Manuscript (called here क) which was at that time available in the Government Sanskrit Library, Sarasvatī Bhavana, Benares. The satisfactory nature of the Manuscript from every point of view as well as the importance of the work both encouraged me to undertake the task in spite of this paucity of Manuscript material. But fortunately I discovered, later on, another Manuscript (called here ख) of the same work. By that time, however, the first part of the work, embodied in the following pages, had been completed. Under these circumstances I had to relegate the important variants from the second Manuscript to the end of Part I in the form of an Appendix. A comparison of the readings of क and ख will show at once that some of the doubtful points and mistakes of the former can be easily cleared up and corrected by the readings of the latter; e. g. cp. my emendations in the following pages. Other observations such as those on the work and the auther, it is better to reserve for the "Introduction" to be given with Part II.

Both the above Manuscripts may be briefly described as follows:-

(1) क. Leaves, 1-76. Complete. Script, Nāgarī. Size, 11·1″ × 4·7″ inches. Lines 10 in a page, and letters 49 in a line. Read and corrected. Handwriting, good. No date, but apparently about 150 years old.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(2) ख. Leaves, 1–34, 70–145. Complete but for the missing folios. Script, Nāgarī. Size, 11·5″ × 4·3″ inches. Lines, 7 in a page; and letters, 39 in a line. Read and corrected. Handwriting, good. No date, but about 200 years old. The colophon at the end of the Manuscript:–

इति महामहोपाध्यायश्रीजयरामन्यायपंचाननभट्टाचार्यविरचिता न्यायसिद्धांतमाला समाप्ता ॥ श्रीविश्वेश्वरो जयति ॥ श्रीकृष्णाय भगवते वासुदेवाय न(म)ः ॥

Government Sanskrit Library,
Sarasvatī Bhavana,
Benares.
April 2, 1927

Mangal Deva Shastri

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ ॐ नमो गणेशाय ॥

न्यायसिद्धान्तमाला ।

ॐ नमः कमलालोलदृगञ्चलविलासिने ।
विचित्रविश्वनिर्माणकारिणे मुरवैरिणे ॥ १ ॥
भुवो हारं हारं रजनिचरभारं परमहो
मुहुः कारं कारं व्यसनपरिहारं दिविषदाम् ॥
स्फुरन्मुक्ताहारं सजलजलदाकारमचिरान्
मनो वारं वारं दशरथकुमारं भज सखे ॥ २ ॥

ज्ञातसामान्यस्य विशेषजिज्ञासोदयात् प्रथमसूत्रे प्रमेयेत्युद्देशादेव समाख्यया सामान्यलक्षणे प्राप्ते तद्विशेषजिज्ञासायां विशेषलक्षणवचनाकाङ्क्षाप्रयोजकं प्रमेयविभागसूत्रम्—

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥ न्या० सू० ।१।१।९ ॥

समुदिते प्रमेयत्वमन्यतमे ज्ञातेऽपि नापवर्ग इति सूचयितुं विभाजकोद्देशकपदयोर्वचनभेदः । प्रमेयमिति प्रमाविषयत्वं सामन्यलक्षणमभिप्रेतम् । अथैवं दिगादीनां संख्यादीनाञ्च प्रमेय-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वाद्विभागे न्यूनत्वम् । तेषामलक्ष्यत्वे तु लक्षणमतिव्याप्तमिति चेन्न । प्रमापदेनात्रात्मादिमात्रगोचरप्रमाया विवक्षितत्वात् ।

यत्तु मुक्तिजनकात्मसाक्षात्कारजनकधीविषयत्वं प्रमेयत्वं तादृशसाक्षात्कारजनकं चात्मादिद्वादशमात्रज्ञानमेवेति । तन्न । अत्रात्मसाक्षात्कारो निर्विकल्पकश्चेत्तज्जनकत्वं द्वादशमात्रविषयकज्ञानेऽसिद्धम् । अथेतरभिन्नत्वेनात्मनः सविकल्पकस्तर्हि दिगादिज्ञानेऽपि प्रतियोगिज्ञानत्वेन तज्जनकत्वमव्याहतमित्यतिव्याप्तिः । अथ वार्त्तिककृन्मते दिगाद्यपि लक्ष्यम् । तुशब्दो हि न दिगादिव्यवच्छेदकः किन्तु चार्थकतया तत्समुच्चायकः । न च तर्हि दिगादेर्विशेषलक्षणाकरणान्न्यूनतापत्तिः । गन्धादिसूत्रादिगादेरपि सङ्ग्रहस्य वक्ष्यमाणत्वादिति चेन्न । तर्हि प्रमाया ज्ञानमात्रस्य वा विषयत्वं प्रमेयत्वमित्येव सम्यक् । स्वात्मनोऽनुयोगितया तदितरपदार्थस्य प्रतियोगितया ज्ञानस्य तत्त्वधीहेतुत्वादिति न किञ्चिदेतत् ।

अत्र आत्मा च शरीरं च इन्द्रियाणि च अर्थाश्च बुद्धिश्च मनश्च प्रवृत्तिश्च दोषाश्च प्रेत्यभावश्च फलं च दुःखञ्च अपवर्गश्चेति विग्रहवाक्यम् । सुखं दुःखानुविद्धत्वेन दुःखमेवेति मुमुक्षोरनुपादेयत्वाय पृथङ् नोक्तम् । अत्र शरीरादेर्गौणदुःखत्वेन शरीरेन्द्रियबुद्धीनां प्रवृत्तिदोषजनिततया फलत्वेनार्थत्वेन चोपधेयसंकरेऽप्युपाधेरसङ्करात् पृथगुक्तिस्तेन तेन रूपेण ज्ञानस्योपयोगित्वसूचनाय । गोवृषन्यायेन पृथगुक्तिरित्यन्ये ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्र प्रथमोद्दिष्टमात्मानं लक्षयति—

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् ॥ न्या० सू० । १ । १ । १० ॥

लिङ्गं लक्षणम् । तत्रेच्छाप्रयत्नज्ञानान्यत्रात्ममात्रस्य, शेषं संसारिणां लक्षणं बोद्धव्यम् । लक्षणमिति वाच्ये लिङ्गमित्युक्तिरहमादिप्रत्यक्षस्य शरीरादिविषयत्वसम्भवादतिरिक्तात्मनि प्रमाणयितुमशक्यतयानुमानसूचनाय ।

परे तु रूपवतामेव द्रव्याणां प्रत्यक्षत्वाल लिङ्गमिति ऋज्वर्थकम् । आकाशाग्रहेपि शब्दग्रहवज् ज्ञानादिग्रहः । आत्मत्वजातिग्रहोपि तथा । अस्तु वा ज्ञानादिमत्त्वरूपमेवात्मत्वं लौकिकप्रत्यक्षगम्यम् । उक्तं च भाष्ये–'आत्मा तावत्प्रत्यक्षतो न गृह्यते (वा० भा० १ । १ । १०) इति । प्रशस्तपादैरपि पृथिव्यादित्रयाणामेव प्रत्यक्षत्वमुक्तमित्याहुः । अहं जानामीत्याद्यात्मांशे मुख्यविशेष्यत्वलौकिकत्वयोरानुभविकत्वाद् भाष्ये देहादिभिन्नत्वेनेत्यर्थः । प्रशस्तपादीयेऽपि बाह्येन्द्रियप्रत्यक्षत्वमभिप्रेतमिति वार्त्तिककारादिसिद्धमात्मनि प्रत्यक्षत्वमेवमुक्तम् । परन्तु देहादिभिन्नत्वमनुमानगम्यमेव । ज्ञानादिकं क्वचिदाश्रितं गुणत्वादित्यादेर्लाघवाद्वक्ष्यमाणबाधकाच्च देहादिभिन्नात्मविषयकत्वात् । तथाहि देहादिकं नात्मा बाह्येन्द्रियग्राह्यत्वात् । नेन्द्रियादिकमतीन्द्रियत्वादानन्त्याच्च । नालयविज्ञानम् । तस्यापि परैः क्षणिकत्वोपगमेन जन्मान्तरबाल्याद्यनुभूतस्य बाल्ययौवनादौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्मृत्यनुपपत्तेरिति पदार्थमालायां विस्तरः ॥

क्रमप्राप्तं शरीरं लक्षयति—

चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ न्या० सू० १।१।११ ॥

चेष्टा साक्षात्प्रयत्नजन्या क्रिया । दारुयन्त्रक्रियेश्वरप्रयत्नजन्यवाय्वादिक्रियानिरासाय साक्षादिति समानावच्छेदकत्वप्रत्यासत्त्येत्यर्थकम् । प्राणक्रिया च प्राणवहनाडीनोदनजन्यैव न चेष्टा । न च भगवच्छरीरचेष्टायामव्याप्तौ तच्छरीराव्याप्तिः । तच्छरीरस्यालक्ष्यत्वाद् दिगादिवत् । अत एवेन्द्रियाश्रयत्वाद्यग्रिमलक्षणयोरपि नाव्याप्तिरित्युन्मापातिः ।

साक्षादित्यसाधारण्येनेत्यर्थकम् । भगवत्प्रयत्नस्य वाय्वादिक्रियायां साधारण्येऽपि सर्गाद्यसम्प्रदायप्रवर्तकभगवच्छरीरक्रियायामसाधारण्यमेवेति प्रमेयतत्त्वबोधकृतः । सर्गादौ भगवदादिशरीरमेव साक्षात्तद्यत्नजन्यक्रियाधिकरणम् । भूतावेशन्यायेनेश्वरशरीरमित्यप्यपरमतत्त्वेन तत्त्वबोधः । वस्तुतो भूतस्य देहेन्द्रियादिप्रवेशसम्भवेऽपि नेश्वरस्य तत्सम्भवः । ईश्वरेच्छादितो ज्ञानैश्वर्यादिरूपावेशस्तु जीवमात्रस्यैव । तस्माज्जीवादृष्टारब्धं श्रवणकीर्तनादिना पुण्यजनकं सर्गाद्यभगवच्छरीरं कृष्णादिशरीरं च लक्ष्यमेव । तत्र जीवकल्पने मानाभावात् । तच्चेष्टा चानुभवयुक्तिभ्यां सिद्धा । साध्यतया तादृशतादृशचेष्टावगाहियत्नत्वेनैव तादृशतादृशचेष्टात्वावच्छिन्ने हेतुत्वात् ।

निष्क्रियविनष्टे खण्डशरीरे पाषाणादिमध्यजातभेकादि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शरीरे चाव्याप्तिवारणाय चेष्टावद्वृत्त्यन्त्यावयविमात्रवृत्तिजातिमत्त्वं लक्षणं वाच्यम् । तथा चेश्वरनृसिंहशरीरेऽपि नरवानरादिसकलमांसलशरीरवृत्तिजातिमादाय लक्षणसङ्गतेस्तत्र चेष्टाविरहेऽपि न क्षतिः । वृक्षशरीरे चेष्टासत्त्वादिन्द्रियसत्त्वाच्च भोगसत्त्वाच्च लक्षणसङ्गतिः । अग्रिमलक्षणयोरपि शरीरखण्डशरीरसाधारण्याय जातिगर्भत्वावश्यकत्वान्नेश्वरशरीराव्याप्तिः ।

शरीरं शरीरमित्यनुगतमतेः शरीरत्वं जातिरवयवसंयोगनिष्ठा परम्परया शरीरगता वृक्षेऽपि चेष्टासमवायिकारणताया ज्ञानादिनिमित्तकारणतायाश्चावच्छेदस्यानुगतत्व एव सम्भवादिति नव्याः । वृक्षस्य जीवत्वं नास्ति । 'श्मशाने जायते वृक्ष' इत्यादिकन्तु वृक्षो दुर्भाग्यपुरुष इत्याद्यर्थकमिति तु प्रमेयतत्त्वबोधे नव्यमतत्वेनोक्तम् । परन्तु फलपुष्पबीजसजातीयानुबन्धजीवनमरणादिदर्शनान्महापातकादिफलत्वश्रुतेः प्रशस्तपादभाष्यविरोधाच्चायुक्तमित्याभाति ।

इन्द्रियं घ्राणादि । तदाश्रयत्वं चैत्रस्येदमिन्द्रियं न तु घटादेरिति प्रतीतिनियामकसंयोगविशेषेण । नातः समवायेन तत्त्वोक्तावसम्भवः । संयोगमात्रेणोक्तौ घटादिसाधारण्यम् । इन्द्रियपदमिन्द्रियपाटवप्रयोजकधातुसाम्यपरम् । पाटवं दूरसूक्ष्मादिदर्शनमिति वार्तिकाद्यनुयायी तत्त्वबोधे वर्द्धमानः । इन्द्रियपदं तज्जन्यज्ञानपरमित्यन्ये ।

अर्थः सुखदुःखान्यतरत् । तत्त्वमवच्छेदकताख्यस्वरूपसम्बन्धेन । प्राग्वज्जातिगर्भं लक्षणं बोध्यम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रमेयविभागे सूत्रस्थेन्द्रियपदादेदि परमैश्वर्य्य इति धात्वनुसारात् साक्षात्कारिज्ञानमात्रसाधनमतीन्द्रियमिन्द्रियमिति लक्षणं लब्धम्। परमाण्वादिवायवीयशरीरात्ममनोयोगादिव्युदासाय साधनमित्यन्तम्। तदर्थस्तु साक्षात्कारिज्ञानभिन्नज्ञानासाधनत्वे सति ज्ञानसाधनम्। नातस्तन्मात्रसाधनत्वाप्रसिद्धिः। न च मनस्यव्याप्तिः। मनसः पृथग्वक्तव्यत्वादत्रेन्द्रियपदस्य बहिरिन्द्रियपरतया तस्यालक्ष्यत्वात्। आत्ममनःसंयोगस्यैव च वैजात्येन हेतुतया सुषुप्तिकाले ज्ञानानुत्पत्तौ न त्वङ्मनोयोगद्वारा त्वचो जन्यज्ञानत्वावच्छिन्नहेतुतेति न त्वच्यव्याप्तिः। आलोकादेर्घटादेर्विषयस्य च वारणायातीन्द्रियमिति। चक्षुरादिसन्निकर्षस्य निर्विकल्पकस्य च वारणं साधनपदस्य करणपरत्वात्। (? न) तत्तदन्यत्वं देयम्। स्मृत्यजनकज्ञानजनकमनःसंयोगाश्रयत्वं तत्त्वम्। स्मृत्यजनकः स्मृतिस्वरूपायोग्यः मनःसंयोगो मनःप्रतियोगिकसंयोग इति तु ज्यायः। यत्तु शरीरसंयुक्तं साक्षात्कारिज्ञानसाधनमिन्द्रियमिति। तन्न। आत्ममनःघ्राणादौ नेत्राञ्जनादौ चातिव्याप्तेः। इत्थं चोक्तरीत्या सामान्यलक्षणेन सामान्यतो ज्ञाते विशेषजिज्ञासायां विशेषलक्षणार्थं विभजते—

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः॥
न्या० सू० १।१।१२॥

इन्द्रियाणि बहिरिन्द्रियाणि। अत्र घ्राणादिपदाद्रूढ्या घ्राणत्वादिविशिष्टस्य लक्ष्यस्योपस्थितौ जिघ्रत्यनेनेत्यादियोगा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वन्द्वोपलब्धिकरणत्वादीनि विशेषलक्षणानि लभ्यन्ते । यदि च त्वक्पदे योगो नास्ति तदा रूढ्युपस्थितं त्वक्त्वमेव लक्ष्यतावच्छेदकं लक्षणं चास्तु । लक्ष्यतावच्छेदकस्य लक्षणत्वं पदार्थमालायामुपपादितम् । अस्तु वा स्पर्शोपलब्धिकरणत्वस्य प्राकरणिकत्वाल्लक्षणया लाभः । घ्राणादीन्द्रियं पृथिव्यादितोऽतिरिक्तमिति मतनिषेधायाह । भूतेभ्य इति । भूतप्रकृतिकानीत्यर्थः । तत्प्रकृतिकत्वं च तद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वम् । एतेनेन्द्रियाणामहंकारप्रकृतिकत्वमिति सांख्यमतं निराकृतम् ॥

अर्थं विभजते—

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥
न्या० सू० १ । १ । १४ ॥

अत्रापि विभाजकसूत्रस्थार्थपदाद् योगेन सामान्यलक्षणं लब्धम् । तद्विना विशेषलक्षणयो (?)रनुपपत्तेः । एवमग्रेऽपीति बोध्यम् । तदर्थाः तेषामिन्द्रियाणामर्था विषयाः । तथा च दर्शनस्पर्शनोभयाग्राह्यबहिरिन्द्रियग्राह्यजातिमद्गुणत्वमर्थत्वं लभ्यते । गुणेति प्रभावारणाय । पृथिव्यादिगुणा इति षष्ठीसमासः । तथा च भाष्यम्-'पृथिव्यादीनां यथाविनियोगं गुणाः' इति । तेन स्नेहद्रवत्वेतरभूतविशेषगुणत्वमिति लक्षणान्तरं लब्धम् । पृथिव्यादिगुणा इत्यनेन गुणगुणिनोरभेदवादो निराकृतः । पृथिव्यां गन्धो, गन्धो न पृथिवीत्यादिप्रतीतेरित्यन्ये ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वार्त्तिककृतस्तु पृथिव्यादयश्च गुणाश्चेति द्वन्द्वसमासः । पृथिव्यादिपदं गुणेतरबाह्येन्द्रिययोग्यपरम् । गुणपदं गन्धादीतरतादृशयोग्यगुणपरम् । गन्धादीनां विशेषत उपादानं तु तेषां प्रति नियतेन्द्रियग्राह्यत्वबोधनाय । तथा चार्थत्वं बहिरिन्द्रियग्राह्यत्वम् । यद्वा पृथिव्यादिपदं गुणेतरमात्रपरम् । गुणपदं गन्धादीतरगुणमात्रपरम् । अर्थत्वमर्थ्यमानत्वं विषयत्वपर्यवसितमित्याहुः ॥

बुद्धिं लक्षयति—

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥
न्या० सू० १ । १ । १५ ॥

बुद्ध्यादिपदं स्वपरम् । इतीति पदवाचि । बुद्ध्यादिपदं समानार्थमित्यर्थः । इति अस्मिन्दर्शन इत्यर्थ इत्यन्ये । अत्र बुद्ध्यादिपदवाच्यत्वं लक्षणं लभ्यते । पदत्रयोपादानं च सांख्यमतव्यवच्छेदाय । तैस्तेषां भिन्नार्थत्वस्वीकारात् । तन्मते हि प्रकृतेराद्यपरिणामो महत्तत्त्वं सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनात्मभावाष्टकाधिकरणं बुद्धिपदार्थः । परे तु भावाष्टकं धर्म्मज्ञानवैराग्यैश्वर्य्याधर्माज्ञानावैराग्यानैश्वर्य्यरूपम् । तत्र धर्मो यागादिजनितोऽष्टाङ्गयोगानुष्ठानजनितश्च । ज्ञानं प्रमाणम् । वैराग्यमैहिकामुष्मिकसुखवितृष्णस्य वशीकारसञ्ज्ञकम् । ऐश्वर्य्यमणिमादिप्रादुर्भावः । उक्तविपरीता अधर्मादय इत्याहुः । ज्ञानपदार्थस्तु बुद्धिनिष्ठो घटाकारादिरूपो वृत्त्यपरनामा बुद्धिप-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रिणामविशेषः । उपलब्धिस्तु निरुक्तपरिणामे दर्पणवत् स्वच्छे चैतन्यप्रतिबिम्ब इति । तन्न । चेतनासुखाद्योः सामानाधिकरण्यानुभवात् पुरुषस्यैव सुखादिमत्त्वेन बुद्धौ मानाभावात् । पुरुषस्य कूटस्थत्वं तु न निर्गुणत्वम् । अपि तु नित्यत्वमुक्तिभागित्ववाह्यान्यत्वादि । ज्ञानमपि न चेतनातिरिक्तं मानाभावात् । न वा वृत्तौ चेतनाप्रतिबिम्बः । वृत्तेरेव चेतनात्मकत्वादिति सङ्क्षेपः ॥

मनो लक्षयति—

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥
न्या० सू० १ । १ । १६ ॥

चाक्षुषज्ञानवतो मैत्रस्य स्वस्वविषयसम्बन्धीनि घ्राणादीनि स्वविषयविषयकसाक्षात्कारकारणकिंचित्समवधानशून्यानि तत्काले स्वविषयविषयकसाक्षात्काराजनकत्वात् । तमोगतघटादिवत् । तच्च कारणं परिशेषादणुमनःसंयोगः । तच्च नित्यं निःस्पर्शद्रव्यत्वात् । पृथिव्यादिभिन्नं चेत्यधिकं पदार्थमालायाम् ॥

प्रवृत्तिं लक्षयति—

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥न्या० सू० १।१। १७॥

प्रवृत्तिरित्यनेन प्रवृत्तित्वं लक्षणमुक्तम् । तच्च ज्ञानादिजन्यतावच्छेदको जीवनयत्नेश्वरप्रयत्नव्यावृत्तोऽनुभवसिद्धो जातिभेदः । अदृष्टाजनकलौकिकप्रयत्नानामपि लक्ष्यत्वम् । तेषाम-

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पि हेयत्वात्। यत्नसामान्यस्यैव लक्ष्यत्वे तु यत्नत्वमेव प्रकृते प्रवृत्तित्वं बोध्यम्। अदृष्टजनकत्वे सति जन्ययत्नत्वं प्रवृत्तित्वमिति तु वर्द्धमानादयः। विभजते। वागिति। वागारम्भो बुद्ध्यारम्भः शरीरारम्भ इति त्रिविधा प्रवृत्तिः। बुद्ध्यतेऽनेति (=ऽनयेति) व्युत्पत्त्या बुद्धिपदं मनःपरमिति वार्त्तिकाद्यः। वाक्पदं ज्ञानहेतूपलक्षकमित्याचार्य्याः। नातो गङ्गादर्शनाद्यनुकूलचक्षुरादिगोचरयत्नेऽव्याप्तिः। एवं च शरीरमनोतिरिक्तज्ञानहेतुगोचरप्रवृत्तित्वं वागारम्भत्वम्। मनोगोचरप्रवृत्तित्वं बुद्ध्यारम्भत्वम्। शरीरगोचरप्रवृत्तित्वं शरीरारम्भत्वम्। शरीरत्वं च चेष्टावत्त्वमात्रम्। तेन दानाद्यनुकूलहस्तादिगोचरयत्ने नाव्याप्तिः॥

दोषान् लक्षयति—

प्रवर्त्तनालक्षणा दोषाः॥ न्या० सू० १।१।१८॥

प्रागुक्तप्रवृत्तिजनकत्वं दोषत्वम्। प्रवृत्तिजनका रागद्वेषमोहाः। न चादृष्टादावतिप्रसङ्गः। जन्यसविषयत्वे सति प्रवृत्तिजनकत्वस्य तत्त्वात्। न च प्रवृत्तिजनकप्रमायामतिव्याप्तिः। तस्या अपि मोहत्वात्। रागद्वेषान्यतया ज्ञानजनकस्यैव प्रकृते मोहत्वात्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रेत्यभावं लक्षयति—

पुनरुत्पत्तिः प्रेत्यभावः॥न्या० सू० १।१।१९॥

उत्पत्तिर्जन्म। पुनरित्यनेन जन्माभ्यासलाभादुत्पत्तेश्च मरणोत्तरत्वनियमान् मरणोत्तरजन्मत्वं प्रेत्यभावपदप्रवृत्तिनिमित्तं लक्षणम्। इतरभेदकं तु जन्मत्वमात्रम्।

तत्र चरमशरीरात्मसंयोगध्वंसो मरणम्। चरमत्वं च यद्यपि न स्वाधिकरणमात्रवृत्तिशरीरात्मसंयोगाकालीनत्वं मरणोत्तरमपि जीवद्दशास्थेन मृतशरीरेणात्मसंयोगाद्व्याप्तेः। स्थविरशरीरसामग्रीकालोत्पत्तिके युवशरीरनाशजन्ये युवशरीरात्मसंयोगनाशेऽतिव्याप्तिश्च। एतेन स्वसमानाधिकरणप्राणशरीरसंयोगासमानकालीनत्वं चरमत्वमित्यपास्तप्रायम्। तथापि स्वसमानाधिकरणैकदानेकावृत्तिजातिमच्छरीरप्राणसंयोगासमानकालीनत्वं चरमत्वम्। मृतशरीरे प्राणसंयोगासत्त्वात् स्थविरशरीरस्य युवशरीरवृत्त्युक्तजातिमत्त्वान्नोक्ताव्याप्त्यतिव्याप्ती। नरत्वादिव्युदासायैकदानेकावृत्तीति। पुरुषान्तरीयनिरुक्तसंयोगकालीनत्वेनाव्याप्तिवारणाय स्वसमानाधिकरणेति जातिविशेषणम्। स्वपदमनुयोगिपरं प्रतियोगिपरं वा। चरमशरीरात्मसंयोगध्वंस इत्यत्र शरीरात्मसंयोगः स्वसमानाधिकरणप्राणशरीरसंयोगकालीनत्वेन विशेष्यः। तेन शवशरीरात्मसंयोगध्वंसे नातिव्याप्तिः। आत्मपदं च तच्छरीरजनकादृष्टवत्परम्। तेनैकपुरुषीयशरीरपुरुषान्तरात्मसंयोगध्वंसे तादृशे नातिप्रसंगः। अत एवेश्वरस्य न मरणमिति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चैत्रप्राणसंयोगासमानकालीनश्चैत्रतदात्मसंयोगध्वंसो मरणम् । एवमन्यत्रापि । शब्दानुगमस्याकिंचित्करत्वादित्यप्याहुः ।

चरमत्वमदृष्टनाशजन्यत्वं मरणाख्यसंयोगविशेषनाशं प्रत्येवादृष्टनाशस्य हेतुत्वादिति वर्द्धमानः ।

चरमः प्राणशरीरसंयोगध्वंसो मरणम्। स च स्वप्रतियोग्याश्रयशरीरवत्त्वसम्बन्धेन मृतव्यवहारं जनयति। शरीरवत्त्वं चास्येदं शरीरमिति प्रतीतिनियामकसंयोगविशेषसम्बन्धेनेत्यप्याहुः ।

आत्मविशेषगुणजनक आद्यः शरीरात्मसंयोगो जन्म । अदृष्टविशेषजन्यः स जन्मेति तु वर्द्धमानः । स्वात्मनि सुखदुःखादिनियामकस्य शरीरपरिग्रहरूपस्य च विलक्षणसंयोगस्याग्रेऽपि सत्त्वादाद्यत्वविशेषणमावश्यकम्। कायव्यूहादिस्थलेऽपि यद्यदवच्छेदेऽपि विलक्षणसंयोगसम्बन्धेन यद्यच्छरीरवत्त्वं तत्तदवच्छेदेन तत्तच्छरीराधीनसुखाद्युत्पत्तिरिति बोध्यम्। आद्यप्राणशरीरसंयोगो जन्मेत्यन्ये ॥

फलं लक्षयति—

प्रवृत्तिदोषजनितोऽर्थः फलम् ॥ न्या० सू० १ । १ । २० ॥

जनित इत्येव फललक्षणम् । जन्यमात्रस्य फलत्वात् । फल निष्पत्ताविति धात्वनुसारात् । न चोद्देश्यत्वेनेदं विशेष्यम्। प्रयोजनादविशेषापत्तेः । प्रवृत्तिदोषजनित इति तु हेयत्वप्रतिपत्तये। तत्र दोषग्रहणं दोषस्य प्रवृत्तिद्वारा प्रवृत्तिकार्यं (+?सुख·) दुःखयोरपि हेतुत्वसूचनाय ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तच्च द्विविधं मुख्यगौणभेदात् । सुखदुःखान्यतरसाक्षात्कारत्वं मुख्यत्वम् । तदितरजन्यत्वं गौणत्वम् । तथा च वार्त्तिककम्-फलशब्दः सुखदुःखोपभोगे मुख्यः । शरीरादिषु गौणः । सुखदुःखसंवेदनं फलमिति भाष्यं तु शरीरादिषु गौणफलव्यवहारपरमिति सम्प्रदायः । गौणमुख्यभेदात् प्रयोजनस्यैव (+ ?द्वै-) विध्यम् । फलं तु शरीरादावपि मुख्यमेव व्यवहारतौल्यात् प्रवृत्तिनिमित्तलाघवाच्चेति तु वर्द्धमानः ॥

दुःखं लक्षयति—

बाधनालक्षणं दुःखम् ॥ न्या० सू० १ । १ । २१ ॥

बाधना पीडा तल्लक्षणं यस्य । दुःखत्वयोगि दुःखमिति फलितम् । दुःखत्वं जातिविशेषोऽनुभवसिद्ध इति नव्याः । बाधनालक्षणं दुःखानुषङ्गि षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं शरीरं चेत्येकाविंशतिः । सुख (=?खं) दुःखसंपर्कात् । शरीरपदं धर्माधर्माद्युपलक्षकम् । तथा चात्मापवर्गेतरप्रमेयत्वमेव दुःखत्वं गौणमुख्यसाधारणम् । मुख्यं तु प्रागुक्तमेवेति सम्प्रदायः ॥

अपवर्गं लक्षयति—

तदत्यन्तविमोक्षोऽपवर्गः ॥ न्या० सू० १ । १ । २२ ॥

आत्यन्तिकी दुःखनिवृत्तिर्मुक्तिरिति प्रागुक्तनिष्कर्षो बोध्यः ॥

॥ समाप्तं प्रमेयप्रकरणम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ प्रमाणाङ्गतया न्याये निरूप्ये न्यायाङ्गं संशयादित्रिकं क्रमेण निरूपयति—

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥
न्या० सू० १ । १ । २३ ॥

संशय इति लक्ष्यं विमर्श इति लक्षणम् । एकधर्म्मिणि विरुद्धोभयावमर्शः संशय इति तदर्थः । एकधर्म्मितावच्छेदकावच्छेदेनान्यतरकोटिप्रकारकत्वे सति तद्विशिष्टे विरुद्धोभयकोटिप्रकारकज्ञानत्वं संशयत्वं फलितम् । द्रव्यं रूपवन्नीरूपं चेत्यादिसामानाधिकरण्येन कोटिद्वयावगाहिसमुच्चयव्युदासाय सत्यन्तम् । वृक्षः कपिसंयोगवांस्तदभाववांश्चेत्यादिसमुच्चयस्य वारणाय विरुद्धोभयेति । तद्विरुद्धत्वं तदनधिकरणवृत्तित्वविशिष्टत्वं कोट्योस्तत्सम्बन्धयोर्वा संसर्गतया भासते । समुच्चये तु न तथा । तेन गुणः संयोगी न वा, वृक्षः कपिसंयोगवांस्तदभाववांश्चेति संशयसमुच्चययोर्नाव्याप्त्यतिव्याप्ती । विरोधिसंसर्गिकबाधबुद्धेः समुच्चयेऽपि विरोधित्वान्न तत्काले समुच्चयोऽपि । मिथोविरोधसंसर्गेण स्थाणुर्वा पुरुषो वेत्यादेरप्येतन्मते संशयत्वम् । कोट्योः प्रकारत्वं विधेयतया वाच्यम् । तेन धूमाभाववानयं धूमवान् स्याद्वन्ह्यभाववानयं वन्हिमानयं स्यादिति तर्के नातिव्याप्तिरिति प्रमेयतत्त्वबोध उक्तम् । एतन्मत

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आहार्य्यस्य यदि संशयत्वं तदा कोट्योर्विधेयतया प्रकारत्व एवेति बोध्यम्। प्रकारत्वेनाविरोधज्ञानं ससंगर्तयापि विरोधज्ञाने प्रतिबन्धकं मणिमन्त्रादिन्यायेन वाच्यमिति बोध्यम्।

परे तु विरुद्धत्वे विरोधज्ञानाभावलाभाय तथाविरोधज्ञानाभावविशिष्टतत्तदभावोभयप्रकारकज्ञानत्वं संशयत्वम्। वैशिष्ट्यं तत्तत्स्वाश्रयावच्छेदेन स्वाधिकरणक्षणव्यवहितोत्तरक्षणावच्छिन्नतत्तत्स्वाश्रयोत्पत्तिकत्वम्। अविरोधज्ञानविशिष्टान्येति वा वाच्यम्। तत्तज्ज्ञानविशिष्टतादृशज्ञानत्वं समुच्चयत्वम्। एतद्द्वयमपि न कार्यतावच्छेदकमार्थसमाजसिद्धत्वात्। बाधबुद्धेर्विरोधित्वेऽविरोधज्ञानस्योत्तेजकत्वान्न तदुत्तरं समुच्चयानुपपत्तिस्तदभावत्वं च। तत्प्रतियोगित्वं तदत्यन्ताभावतद्वद्भेदसाधारणमित्याहुः। यत्तु संशये कोटिद्वयप्रकारतानिरूपितविशेष्यतैका समुच्चये तद्भेद इति प्रमेयतत्त्वबोधोक्तं तत्तुच्छम्। वैपरीत्ये विनिगमकाभावादेकत्र द्वयमिति न्यायेन समुच्चयेऽपि तत्सत्त्वात्। संशयमात्रे तत्सत्वाय नियामकान्तरकल्पनापाताच्चेति दिक्।

संशयत्वं मानसत्वव्याप्यं जातिः। चाक्षुषादिकं तु न संशयः। अस्तु वा चाक्षुषत्वादिव्याप्यं नानासंशयत्वम्। जातेरप्यांशिकत्वं न दोषायेत्यपि तत्त्वबोधे। संशयत्वमखण्डोपाधिरित्यपरे।

कारणमुखेन त्रिधा संशयं विभजते। समानेत्यादि। समानः कोटिद्वयसहचरितो धर्मः। अनेकस्मात्परपक्षविपक्षतो व्यावृत्तो धर्म्मोऽनेकधर्म्मः। एकपदं सपक्षविपक्षगतपरं तद्भिन्नः सपक्ष-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विपक्षव्यावृत्त इत्यन्ये। अत्र सपक्षविपक्षव्यावृत्तत्वं न तत्कोटितत्कोट्यभाववदवृत्तित्वम् । तादृशधर्मवत्तानिश्चयस्य व्याप्यवत्तानिश्चयतया तदुभयविशिष्टबुद्धिविरोधित्वेन संशयहेतुत्वायोगात् । न चैकतरविरहविशिष्टस्यान्यतरस्य विरोधित्वम्, अत एव सत्प्रतिपक्षस्थलेऽपि संशय इति वाच्यम् । गौरवान्मानाभावाच्च । किन्तु तत्कोटितत्कोट्यभावसहचरिताभावप्रतियोगित्वम् । तदुक्तं न्यायनिबन्धप्रकाशे—सजातीयविजातीयनिष्ठाभावप्रतियोगित्वमसाधारण्यमिति । उक्तं च मनो(?)साधारणमन्वयेनासाधारणं व्यतिरेकेण कोटिद्वयोपस्थापकमिति ।

सपक्षविपक्षव्यावृत्तत्वेन सन्दिग्धधर्मवत्ताज्ञानं संशयहेतुरित्यन्ये । सपक्षविपक्षौ तत्त्वेन निश्चितौ येन येन रूपेण तत्कोटितत्कोट्यभाववत्त्वनिश्चयस्तेन रूपेण तद्व्यावृत्तत्वधीर्हेतुरित्यपरे ।

विप्रतिपत्तिः पदजन्या तत्तदभावोपस्थितिः । यथा शब्दो नित्यो न वेत्यादौ । अत्र तत्तज्ज्ञानविशिष्टसंशयत्वस्य कार्यतावच्छेदकत्वान्न व्यभिचारः ।

प्रसङ्गात् संशयासाधारणकारणान्तरमाह । उपलब्ध्येति । उपलब्धिस्तत्कोटिनिश्चयोऽनुपलब्धिस्तदभावनिश्चयस्तयोरव्यवस्थाऽभावस्तस्मात् । विशेषापेक्ष इति विशेषो विशेषणं कोटिद्वयं तदपेक्षस्तज्ज्ञानापेक्ष इति संप्रदायः । उपलब्धिः कोट्योः, अनुपलब्धिस्तयोर्धर्मिण्यनिश्चयः । व्यवस्था विशेषदर्शनं तद-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावोऽव्यवस्था । विशेषो धर्म्मीन्द्रियसन्निधिस्तदपेक्ष इति तु नव्याः। भाष्यकृतस्तु—उपलब्धिः प्रामाण्यम्, अनुपलब्धिः प्रामाण्यविरोधिभ्रमत्वम् । तयोरव्यवस्था संशयः। एवं च प्रामाण्यसंशयजन्यो भ्रमत्वसंशयजन्यश्च संशयः। इति पञ्चविधः संशयः।

विशेषापेक्षो विमर्श इति तु लक्षणम्। एकधर्मिकभावाभावप्रकारकत्वरूपविशेषवान् विमर्शो ज्ञानमिति तदर्थः। युक्तश्चैतल्लक्षणाभिधाने कारणकथनस्यानुपयुक्तत्वादित्याहुः। प्रामाण्यसंशयादिजन्मा संशयज्ञानविषयत्वादिसाधारणधर्मदर्शनादेव । प्रामाण्यसंशयस्तु प्रतिबन्धकापनयनाय। अगृहीताप्रामाण्यकनिर्णयस्य विरोधित्वादिति तु वार्त्तिककारादिशपथसिद्धम्। नव्यास्तु साधारणधर्मवत्ताग्रहादेः पृथक्कारणत्वे मानाभावः। सामान्यतः कल्पितविशिष्टबुद्धिसामग्रीत एवाविरुद्धोभयविशिष्टबुद्धिवद्विरुद्धोभयविशिष्टबुद्धिसम्भवात् । साधारणधर्मज्ञानादीनां विशेषणज्ञानहेतुत्वेनोपयोगः । तत्तज्जन्यविशेषणज्ञानस्य फलोपधानमादाय पंचविधविभागः। विप्रतिपत्तिपदं च साधारणासाधारणधर्मज्ञानप्रामाण्याप्रामाण्यसंशयाजन्यकोटिप्रतिपत्तिपरमिति नाधिक्यमित्याहुः॥

न्यायपूर्वाङ्गत्वाविशेषेऽपि निर्णयेच्छाजनकस्य संशयस्येच्छाविषये प्रयोजने प्रयोजकत्वात् संशयानन्तरं प्रयोजनमनुसंधाय प्रयुज्यमानन्यायार्थं दृष्टान्तानुसरणमिति ततः प्राक् प्र-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

योजनस्योद्दिष्टत्वादुद्देशक्रमसंगत्या प्रयोजनलक्षणाय सूत्रम्—

यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् ॥
न्या० सू० १ । १ । २४ ॥

अधिकृत्य उद्दिश्य । अर्थशब्दोऽभ्यर्थमानार्थकतया–'उद्वृत्तो हि ग्रन्थः–' इति न्यायान्मुख्ययोः सुखदुःखाभावयोर्गौणस्य तत्साधनस्य च प्रयोजनस्य संग्रहार्थः[1]। तथा च यस्य यत्साधनताज्ञानाधीना प्रवृत्तिस्तत्तस्य प्रयोजनम्। परे तु प्रवृत्त्यभावेऽपीच्छाविषयमात्रेण प्रयोजनव्यवहारात् साध्यतयेच्छाविषयत्वं प्रयोजनत्वम्। साध्यतयेति सुखत्वादिव्युदासायेत्याहुः। इतरेच्छानधीनेच्छाविषयत्वं मुख्यत्वम्। तदधीनेच्छाविषयत्वं गौणत्वम्। न च सुखदुःखाभावसाक्षात्कारेच्छाधीनेच्छाविषयतया सुखदुःखाभावयोर्गौणप्रयोजनत्वापत्तिः। सुखी स्यां निर्दुःखी स्यामित्येवेच्छोदयात् सुखत्वादिज्ञानस्यैवेच्छाहेतुत्वात्। तयोः साक्षात्कारस्य तु तदुभयव्याप्यतया नेच्छाविषयत्वमिति ॥

प्रयोजने ज्ञाते प्रयुज्यमाने न्याये दृष्टान्तानुसरणमिति प्रयोजनादस्यापकर्षः, अभ्युपगमप्रयोजकतया तद्गर्भसिद्धान्तादुत्कर्ष इत्युद्देशक्रमसंगत्या दृष्टान्तलक्षणाय सूत्रम्—

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ न्या० सू० १ । १ । २५ ॥

---

१ cp. 'उद्वृत्तो हि ग्रन्थः समधिकफलमाचष्टे ।'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शास्त्रापरिशीलनेनापरिपक्वबुद्धयो लौकिकास्तत्परिशीलन-परिपक्वबुद्धयः परीक्षकाः। कथाबहुत्वाद्बहुवचनमिति टीकाकृतः। एवं च वादिप्रतिवादिनोर्यत्र बुद्धिसाम्यं समबुद्धिः स दृष्टान्तः। टीकायां लौकिकपरीक्षकाणामिति दिङ्मात्रम्। बुद्धिप्रमात्वप्राप्तये वा तत्। साध्यसाधनोभयवत्तानिश्चयसाध्याभावसाधनाभावोभयवत्तानिश्चयान्यतरवत्ता यत्र स दृष्टान्त इति पर्यवसितम्। आद्यनिश्चयवत्त्वमन्वयिदृष्टान्तत्वम्। द्वितीयतद्वत्त्वं व्यतिरेकिदृष्टान्तत्वं बोध्यम्। साध्याभाववत्त्वादिकं वैज्ञानिकसाधारणं तेन केवलान्वयिनि नाव्याप्तिरिति दिक्॥

॥ इति न्यायपूर्वाङ्गप्रकरणम्॥

एवं न्यायपूर्वाङ्गप्रकरणं समाप्य दृष्टान्तोपजीवकत्वादभ्युपगमस्य तदनु न्यायस्याश्रयनिरूप्यत्वात् ततः प्राङ् न्यायाश्रयसिद्धान्तप्रकरणम्। तत्र सिद्धान्तसामान्यलक्षणाय सूत्रम्—

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः॥

न्या० सू० १। १। २६॥

सिद्धान्त इति लक्ष्यनिर्देशः। शेषं लक्षणम्। तन्त्रपदं सर्वतन्त्रप्रतितन्त्रपरम्। संस्थितिः संस्थानं स्वरूपमिति यावत्। तथा च सर्वतन्त्रप्रतितन्त्राधिकणाभ्युपगमान्यतमत्वं तत्त्वम्। वस्तुतस्तु तन्त्र्यन्ते व्युत्पाद्यन्ते पदार्था अनेनेति तन्त्रं प्रमाणं तदधिकरणमाश्रयो ज्ञापकतया येषां ते पदार्थास्तेषामभ्युपगमो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ञानविशेषस्तस्य संस्थितिरित्थमेवेति व्यवस्थासन्देहरूपतेति यावत् । तथा च तत्तच्छास्त्रसिद्धोऽर्थस्तन्निश्चयो वा तत्तच्छास्त्रसिद्धान्तः ।

तेन शब्दादौ नित्यत्वानित्यत्वयोर्द्वयोरर्थयोरप्रामाणिकत्वेऽपि मीमांसकस्य नित्यत्वाभ्युपगमो नैयायिकस्यानित्यत्वाभ्युपगमः सिद्धान्तोऽविरुद्धः । एवमभ्युपगतत्रयीप्रामाण्यस्य सुरगुरोर्लोकायतशास्त्रप्रणयने तच्छास्त्रसिद्धार्थाभ्युपगमस्यापि तच्छास्त्रीयसिद्धान्तत्वम् । समयबन्धस्तु तत्तच्छास्त्रसिद्धान्ताविरोधेन कथा कार्येति निश्चयः । तादृशनिश्चये तद्विरुद्धाभिधानेऽसिद्धान्त इति दिक् ॥

विभजते—

स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥
न्या० सू० १ । १ । २७ ॥

कश्चित्तु स चतुर्विध इति भाष्यं न तु सूत्रान्तर्गतं वार्त्तिके तद्विनाकृतस्यैव सूत्रत्वेनोक्तेरित्याह । पंचम्यर्थान्वयानुरोधादावश्यकं तदिति तु बोध्यम् । स सिद्धान्तश्चतुर्विधः सर्वतन्त्रादिस्वरूपाणां परस्परभेदादिति सूत्रार्थः । सर्वतन्त्रसिद्धान्तस्येतरोपजीव्यत्वात् प्राथम्यम् । प्रतितन्त्रपरिग्रह इतरयोरवतारादनन्तरं स उक्तः । उपजीव्योपजीवकभावात् परयोः क्रमः । प्रतित-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न्त्रसिद्धान्तादेः क्वचिदभ्युपगमसिद्धान्तसंकरो न दोष उपाधेरसंकरादिति ॥

तत्राद्यं लक्षयति—

सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥ न्या० सू० १ । १ । २८ ॥

सर्वशास्त्राविरुद्धः शास्त्रो(=? स्त्रा-)र्थस्तदभ्युपगमो वा स इत्यर्थः । यथा घ्राणादीनीन्द्रियाणि । भौतिकाभौतिकत्वविवादेऽपि धर्ममात्रेऽविवादात् । प्रमाणानि प्रमेयसाधनानीति भाष्यादौ प्रमाणादिसंख्यायां विवादेऽपि सामान्यतोऽविवादात् । ननु मानमेयव्यवस्थानङ्गीकर्तृशून्यत्वादि (+?वादि) माध्यमिकादिभिरनुपगमादिदमयुक्तमिति चेन्न । सर्वतन्त्रपदस्य वादिप्रतिवादितन्त्रपरतया नैयायिकवैशेषिकाद्योः कथायामेतस्य सर्वतन्त्रसिद्धान्तत्वात् । तथा च प्रकृतकथानिरूपकशास्त्रसामान्यसिद्धोऽर्थस्तदभ्युपगमो वा स इति फलितम् । दृष्टान्तस्याप्येवंविधत्वेऽप्युपाधिभेदाद्भेदः ॥

द्वितीयं लक्षयति—

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ॥ न्या० सू० १ । १ । २९ ॥

समानशब्दोऽत्रैकार्थः । यथा वृक्षमहीरुहादिशब्दाः समाना-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

र्था इत्यत्र । तथा च प्रकृतकथानिरूपकैकतन्त्रसिद्धस्तादृशापरतन्त्रासिद्धस्तदभ्युपगमो वा स इति सूत्रार्थः । यथा नैयायिकसांख्ययोः कथायां भौतिकानीन्द्रियाणीति नैयायिकानामभौतिकानीति सांख्यानाम् । उभयवाद्यन्यतरानभ्युपगतविषयकशास्त्रनिबद्धार्थाभ्युपगमः स इति वर्द्धमानः ॥

तृतीयं लक्षयति—

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥ न्या० सू० १ । १ । ३० ॥

यस्य सर्वज्ञत्वादेर्विशेषस्य सिद्धौ जायमानायामेवान्यस्य प्रक्रियमाणस्य सकर्तृकत्वादेः सिद्धिः स सर्वज्ञत्वादिविशेषोऽधिकरणसिद्धान्त इति निबन्धेऽर्थः । तथा च पक्षधर्म्मताबलेनेतरविशेषबाधादिना लभ्योऽर्थस्तदभ्युपगमो वाधिकरणसिद्धान्तः । यथा क्षित्यादिकं सकर्तृकं कार्यत्वादित्याद्यनुमानात् कर्तुः सर्वज्ञत्वादि तदभ्युपगमो वेति ॥

चतुर्थं लक्षयति—

अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ न्या० सू० ॥ १ । १ । ३१ ॥

अपरीक्षितस्य साक्षादसूत्रितस्याभ्युपगमात्तद्विशेषपरीक्षणं भवति । अन्यथा विशेषपरीक्षणमाश्रयासिद्धं स्यात् । तस्माद्विशेष-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परीक्षणाज्जायतेऽसूत्रितमप्यभ्युपगतं सूत्रकारेण सोऽयमर्थापत्तिसिद्धोऽभ्युपगमोऽभ्युपगमसिद्धान्तः । यथा मनस इन्द्रियत्वाभ्युपगम इति ॥

॥ इति न्यायाश्रितसिद्धान्तप्रकरणम् ॥

न्यायस्य सिद्धान्तोपजीवकत्वात् सिद्धान्तानन्तरं न्यायप्रकरणम् । स चोचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायः समुदायिनामवयवानामुक्त्यै (+?-व) लभ्यत इति सूत्रकृता पृथङ् नोक्तम् (=?-क्तः) । तत्राक्षिप्तसामान्यलक्षणपूर्वकं तदवयवविभागसूत्रम्—

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥
न्या० सू० १ । १ । ३२ ॥

विभागेन न्यूनाधिकसंख्याव्यवच्छेदकेनावयवस्य द्वित्रिदशत्वादि व्यवच्छिन्नम् । तत्र प्रतिज्ञादिसाधकयुक्त्या द्वित्रिव्यवच्छेदः । संशयो जिज्ञासा प्रयोजनं शक्यप्राप्तिः संशयव्युदासः प्रतिज्ञादयश्चेति दश । तत्र संशयो न्यायप्रयोजको जल्पवितण्डयोर्विप्रतिपत्तिजन्मा विचार्य्यवस्तुगोचरो वादिशक्त्यशक्तिविषयो वा । अनुविधेयनिष्ठस्थेयस्य तु निर्णीतार्थत्वाद्विचार्ये तदभावाद्वादिनोः शक्त्यशक्तिविषय एव विचारगोचरः । आहार्य्यवादे तु साधारणादिधर्मज्ञानजो वादिनिष्ठोऽपि स्वार्थविचारेषु नि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ष्टः । जिज्ञासा च न्यायप्रयोजिकेच्छानुविधेयस्थेयगता कथायाम् । अन्यत्र स्वगता । क्वचिच्छिष्यगता । प्रयोजनं कथायां यदुद्देश्यम् । अन्यत्र स्वज्ञानं शिष्यज्ञापनं च । शक्यप्राप्तिः पदतदर्थवाक्यप्रमाणं तदाभासपाटवात्मिका । पाटवं ज्ञानशक्तिः । परार्थानुमान एवैषा । संशयव्युदासस्तर्कः । संशयो व्युदस्यतेऽनेनेति व्युत्पत्तेः । स च विषयपरिशोधकस्तर्कः ।

तदेतत्पञ्चकं न्यायाङ्गमपि न शब्दाज्ञानम् (=शब्दज्ञान) उपयुज्यते । चतुर्णां स्वरूपसतामेवोपयोगात् । प्रयोजनस्य ज्ञातस्योपयोगेऽपि शब्देनैव तज्ज्ञाने नियमाभावात् । एतत्पञ्चकस्याशब्दतयाप्यवयवलक्षणागमनान्नावयवत्वम् ।

तत्र प्रागुक्तन्यायलक्षणे प्रतिज्ञात्वादिकं न्यायत्वाघटितं ग्राह्यम् । अन्यथान्योन्याश्रयापत्तेः । इत्थं च उचितानुपूर्वीकेति व्युत्क्रमोक्तप्रतिज्ञादिपञ्चकस्य विभिन्नसाध्यादिवाचकपदघटितस्य च व्युदासाय तदन्यार्थकम् । तेन नाननुगमो न वा विशेष्यांशवैफल्यम् । अवयवत्वं च न्यायान्तर्गतत्वे सति प्रतिज्ञात्वाद्यन्यतमत्वम् ।

प्रतिज्ञात्वादिकं च न्यायत्वाघटितं ग्राह्यम् । पञ्चधा तत्प्रवेशे गौरवात् । नातः सत्यन्तवैफल्यम् । ननु स्मरहरो द्रव्यं, रमेशो द्रव्यमित्यादिप्रतिज्ञाघटके हरो द्रव्यमित्यादावतिव्याप्तिः । केवलं हरो द्रव्यमित्यादिप्रतिज्ञासंग्रहाय तत्तदानुपूर्व्या अप्यन्यतमत्वेन ग्राह्यत्वात् । न चेयं लक्ष्यैव तस्य प्रतिज्ञान्यायाधिक्येन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निग्रहापातादिति चेन्न। प्रतिज्ञाद्यघटकत्वे सतीति वाच्यत्वात् । तत्त्वं च न प्रतिज्ञाद्यन्यत्वे सति प्रतिज्ञादिविषयिताव्यापकविषयिताप्रतियोगित्वम्, प्रतिज्ञात्वादेरनुगतस्य सत्त्वे सति पर्वत इत्यादि हरौ द्रव्यमित्यादिप्रतिज्ञाघटके सम्भवात् तद्विषयितायोगिनि वह्निमान्, शिवो द्रव्यमित्यादिप्रतिज्ञाविषयित्वाव्यापकत्वादसत्त्वे तत्तत्प्रतिज्ञाभाने नियमतो यदवयवान्तरभानं तत्रातिव्याप्तेः । किन्तु न्यायत्ववत्प्रतिज्ञात्वस्य पर्याप्त्या समुदितवृत्तेस्तदन्येनैकदेशेऽपि वृत्तेस्तेन प्रतिज्ञात्वम्। प्रतिज्ञाविषयिताघटकविषयिताप्रतियोगित्वं वा तद्घटकत्वम्। तच्च यद्यपि प्रतिज्ञायामप्यस्ति तथापि समुदितप्रतिज्ञावृत्तितत्तदानुपूर्व्यवच्छिन्नभिन्नत्वविशेषितं तदिह ग्राह्यम्।

वस्तुतः प्रतिज्ञात्वमिह तावदन्यतमानुपूर्वीमत्त्वम् । तथा च स्वावच्छिन्नभिन्नत्वविशिष्टस्वावच्छिन्नघटकत्वसम्बन्धेन तावदन्यतमानुपूर्वीविशिष्टानुपूर्वीमत्त्वमेव तद्घटकत्वम्। स्मरहरौ द्रव्यमित्यादिघटके हरौ द्रव्यमित्यादावविकलमनुगतं चेति । इदं हरौ द्रव्यमित्यादौ स्मरहरौ द्रव्यमित्येतद्घटकहरौ द्रव्यमित्यादौ च तत्तज्ज्ञानानन्तरज्ञानविषयत्वादिरूपतया विभिन्नानुपूर्वीणामनुगतरूपेणान्यतमत्वमध्ये निवेशे । अन्यथा न्यायान्तर्गतत्वे सतीत्यस्य वैयर्थ्यापत्तेश्च। न च हरौ द्रव्यमित्यत्र सर्वत्रैकैवानुपूर्वी। आनुपर्व्या अतिरिक्ताया अनभ्युपगमेनासम्भवात्। एवं हेत्वादिघटकत्वमपि निर्वाच्यमिति बोध्यम्।

उदासीनवाक्यवारणाय न्यायान्तर्गतत्वे सतीति । तत्त्वं च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न न्यायविषयिताव्यापकविषयिताप्रतियोगित्वं न्यायत्वस्यानुगतत्वे पर्वतो वह्निमानित्यादावसम्भवात्। अग्न्यादिपदघटितस्यापि न्यायत्वात्। अननुगतत्वे तु न्यायविषयिताव्यापकविषयिताकोदासीनसाधारण्यात्। किन्तु पर्य्याप्तीतरसम्बन्धेन न्यायत्ववत्त्वं न्यायविषयिताघटकविषयिताप्रतियोगित्वम्। स्वावच्छिन्नघटकत्वसंबन्धेनान्यतमन्यायानुपूर्वीविशिष्टत्वं वा तत्। अस्य न्याये सत्त्वेऽपि प्रतिज्ञाद्यन्यतमत्वाभावाददोषः। न च वस्तुगत्या न्यायान्तर्गतं यत्प्रतिज्ञादिकं तावदन्यतमत्वमेव लक्षणमस्तु किं सत्यन्तेनेति वाच्यम्। अन्यतमत्वस्यानन्तभेदगर्भतापत्तेरिति दिक्। अथ प्रतिज्ञाघटकान्यत्वं प्रतिज्ञादावसम्भवि पर्वत इति वह्निमानिति भागातिरिक्तायास्तस्या अभावादिति चेन्न। द्वौ नैको, घटपटोभयं न घटो, न्यायो न प्रतिज्ञेत्यादिप्रतीत्या व्यासज्यवृत्तिधर्म्मावच्छिन्नाधिकरणतायास्य भेदस्य स्वीकारात्। तदस्वीकारे प्रतिज्ञादिघटकानुपूर्व्वीभिन्नानुपूर्व्वीमत्त्वं वाच्यम्।

परे तु द्वित्वादिसामानाधिकरण्येनैकत्वाद्यवच्छिन्नभेद उक्तप्रतीतेर्विषयनञर्थघटनायामेव तथा कल्पनाद् द्वावेको, घटपटोभयं घट इत्यादयो न व्यवहाराः। तथा च पर्व्वत इत्याद्यानुपूर्व्व्यवच्छिन्नभेदे यादृशानुपूर्व्वीसामानाधिकरण्यं तादृशानुपूर्वीमत्त्वं वाच्यमित्याहुः।

यत्तु समस्तरूपोपपन्नं लिङ्गप्रतिपादकं वाक्यम्। तथाहि प्रतिज्ञादिवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते, तेन विशेषणतावच्छेदकप्रकारको निश्चयो जन्यते, ततः परामर्शो जा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत इति न्यायजन्यज्ञानस्य परामर्शप्रयोजकत्वम्। न च न्याय-जन्यज्ञानमेव परामर्श उपनयात्तदुत्पत्तेरिति वाच्यम्। वादिवाक्यत्वेन तज्जन्यज्ञाने प्रामाण्यसंशयात्। अत एव तत्परामर्शजनकमपि उपनये व्याप्तिभानं नास्ति व्याप्तस्य पक्षधर्म्मताकाङ्क्षायां धूमवान् पर्व्वत इत्येवमुपनयादिति च निबन्धटीकाकारादिसम्मतम्। उपाध्याया अप्येवम्। वह्निव्याप्यधूमवानयमिति वाक्ये तदवयवे च न न्यायतदवयवलक्षणातिव्याप्तिः। तेन परामर्शेन तदवयवेन परामर्शजनकस्य जननात्। ततो बाधितत्वासत्प्रतिपक्षित्वयोरलाभेन तज्जन्यपरामर्शस्यानुमितिचरमकारणत्वाभावाच्च। एवं तादृशे ऽनाप्तोक्तवाक्ये नातिव्याप्तिः। न चास्तु सोऽपि न्याय एव संक्षेपतः परामर्शप्रयोजकवाक्यस्यैव तत्त्वादिति वाच्यम्। कथायामाकाङ्क्षाक्रमेणैवाभिधानमिति प्रथमं विशिष्टवैशिष्ट्ये सा नास्तीति तदभिधाने निग्रहापत्तेरिति।

तदयुक्तं पञ्चवाक्यानामेकवाक्यत्वाभावात्। प्रतिज्ञाया निगमनेन उदाहरणस्यावयवान्तरेण केनापि तदसम्भवात्। अथ धूमज्ञानव्याप्यवह्निमत्पर्वतत्वविशिष्टे धूमव्यापकवह्निमदभिन्नधूमवत उदाहरणार्थस्य निगमनार्थान्वितोपनयार्थस्य चाभेदेनान्वयोऽस्तु। न च धूमाद्वह्निमान्पर्व्वतो धूमव्यापकवह्निमद्धूमवानित्याद्यानुपूर्व्या एव तादृशबोधकत्वं तथाप्येकत्र द्वयमिति न्यायेन पर्वतत्वविशिष्टे सर्व्वेषामन्वयसंभवादिति चेन्न। धूमवानित्यस्य स इत्यनेन व्यवधानाद् यो य इत्येतस्य साकाङ्क्षत्वाच्च न वह्नि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मानित्यनेन बोधकत्वम् । न च स इत्यस्य धूमवानेवार्थः, यो य इति यत्पदार्थस्यैव तत्पदार्थत्वात् । किं च यो रूपवान् स एवायमित्यादावस्तु तदर्थो विधेयः । प्रकृते तु तदर्थस्य विधेयान्तरावरुद्धतया न पर्व्वते विधेयत्वसंभव उद्देश्यत्वविधेयत्वयोर्विरुद्धत्वात् । अपि च यो य एतद्रूपवान् स एतद्रसवानित्यादिप्रयोगायोग्यत्वाय वीप्सायाः अवयवीभूतयत्पदशक्त्या महानसतदन्यत्वादिरूपेण समुदायशक्त्या च व्याप्तेर्बोधकत्वमावश्यकमनेकस्य च न पर्व्वते भेदः । वस्तुतस्तादृशबोधस्य प्रकृतानुपयुक्ततया न तात्पर्य्यविषयत्वमिति दिक् ।

पञ्चवाक्यैरेकवाक्यतयेत्यस्य यद्यद्वाक्यस्यैकवाक्यत्वसंभवस्तद्वाक्यैकवाक्यतयेत्यर्थः । इत्थं च न्यायप्रयोज्यलिङ्गपरामर्शविशेषगर्भे लक्षणे तात्पर्य्यम् । यत्त्विति वादिन इत्यपि कश्चित् ॥

तत्र प्रतिज्ञायाः प्राथम्यात्तल्लक्षणाय सूत्रम्—

साध्यनिर्देशः प्रतिज्ञा ॥ न्या० सू० १ । १ । ३३ ॥

साध्यस्य निर्देशः पक्षतावच्छेदकविशिष्टबोधकवाक्यम् । तथा च पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यबोधको न्यायावयवः प्रतिज्ञेति लब्धम् । विशिष्ट इत्यन्तेनोदाहरणनिगमनयोः, वैशिष्ट्येत्यन्तेनोपनयस्य व्युदासः । साध्यस्य हेतुत्वेन न प्रयोगः सिषाधयिषयान्यथानुपगमात् । निगमने च नायंपदानुषङ्गः । उपनयस्थायमादिनिगमनान्तं तु न न्यायावयव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यदोषः । न चाधिकरणं वह्निमद्भूमात्, प्रतियोगित्वं भावव-त्त्वेन मीयमानत्वादित्यादिन्यायस्थलीयोपनयातिव्याप्तिः । विशिष्ट इत्यत्र विशेष्यत्वस्य सप्तम्यर्थत्वादीदृशन्यायानङ्गी-काराद्वा ।

ननु मैत्रः पचति, अयं गौरित्यादिप्रतिज्ञाया एव यथोक्त-वैशिष्ट्यज्ञानजनकत्वं पाकाविशिष्टकृतेः साध्यतावच्छेदकेन समवा-येन गोत्वविशिष्टस्य च तादात्म्येन निरुक्तपक्षे वैशिष्ट्यबोधात् । न चायं गौरिति गोत्वसाध्यका प्रतिज्ञा गोत्वत्वादेरनुपस्थित-त्वानुपपत्तेः । पदार्थतावच्छेदकजातौ हेत्वर्थान्वयायोगाच्च । प-र्वतो वह्निमानित्यादौ पुनरनुमितौ साध्यस्य वह्नेः संयोगो भा-सते । शाब्दज्ञाने तु वह्निमतो भेद इति न तथाजनकत्वम् । न चास्तु वह्निमत्साध्यकैवेयं प्रतिज्ञा वन्हिव्याप्यधूमवानयमित्युप-नयासंगतेः । एवमितरेभ्यो भेदे साध्ये पृथिवीतरेभ्यो भिद्यत इतरभिन्नेत्यादावप्रीतिचेन्न । यत्र यत्र यादृशी यादृशी प्रतिज्ञा संप्रदायसिद्धा तादृशप्रतिज्ञाजन्यबोधानामन्यतमबोधजनकस्य बोधकान्तार्थत्वात् । एवं च तादात्म्येन गवि साध्ये पक्षे गवा-भेदस्य संयोगेन समवायेन वा वन्हौ वह्निमदभेदस्य समवायेन पाककृतौ पचतीत्यत्र पाककृतिमत्त्वस्य पक्तेत्यादौ पाककर्त्रभेद-स्य च संबन्धान्तरेण तु पाककृतिमानित्येव प्रतिज्ञेति पाककृति-मदभेदस्यैव विशेषणतयेतरेभ्यो भेद इतरेभ्यो भिद्यत इत्यत्रेतर-भेदाश्रयत्ववत्त्वस्येतरभिन्नेत्यत्रेतरभेदाश्रयाभेदस्य इतरान्येत्य-त्रेतरान्याभेदस्य नेतराणीत्यत्रेतरभेदवत्त्वस्य संबन्धान्तरेण तु इ-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तरभेदवतीत्येव प्रतिज्ञेतीतरभेदवदभेदस्यैव बोधा विशिष्टा लक्षणे निवेश्याः । अत एव हेतुत्वपक्षक आधारत्वादिना मेये साध्ये संबन्धान्तरेण मेये हेतौ हेत्ववयवेनाधारत्वादिना मेयवैशिष्ट्यस्य पक्षे बोधनादिति दिक् ।

यत्तु प्रतिज्ञात्वं जातिरनुगतानतिप्रसक्ततान्त्रिकव्यवहारादिति । तन्न । कत्वादिना शुकप्रभवत्वादिना च सांकर्य्यात् । यदपि पञ्चभिरवयवैर्विजातीयं विजातीयं ज्ञानं जन्यत इति विजातीयज्ञानजनकवाक्यत्वमेव प्रतिज्ञात्वादिकमिति । तदप्यसत् । विजातीयज्ञानप्रयोजकरूपमन्तरेण जातिकल्पने सर्वस्य सर्वजातीयत्वमेकजातीयत्वं वा स्यात् । अतः प्रयोजकं प्रतिज्ञात्वादिकमनुगतानतिप्रसक्तं स्वीकार्य्यमिति तस्यैव लक्षणत्वसंभवे वैजात्ये मानाभावात् । न ह्युदासीनपर्वतो वह्निमानित्यादिवाक्यजबोधात् प्रतिज्ञादिजन्यबोधे किन्तु (?) वैजात्यमानुभविकम् । किञ्च द्वित्र्याद्यवयवजन्ये द्वित्र्याद्या जातय एकैकजन्य एकैका इति सांकर्य्यमिति दिक् ।

ननु विप्रतिपत्तेरेव साध्योपस्थितौ तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानमेवोचितमिति प्रतिज्ञा न साधनाङ्गमिति चेन्न । विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहेण निराकाङ्क्षत्वात् । पराविप्रतिपत्त्या समयबन्धेन चान्तरितत्वाच्च । आवृत्तौ तु सैव प्रतिज्ञा । न च हेत्ववयवेनाक्षेपात् साध्योपस्थितिसाध्याभिधाने हेत्वभिधानं तेन साध्योपस्थितिरित्यन्योन्याश्रयाद् वादिवाक्येनाक्षेपाभावाच्च । अन्यथाध्याहारादिना लाभे न्यूनत्वादिदोषो निर्वि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
BVRSSMV

षयः स्यादिति। विप्रतिपत्तिवाक्ये साध्यपदं वस्तुपरं प्रतिज्ञावाक्ये तु ज्ञानपरं हेत्वन्वयानुरोधादित्यपि वदन्ति।

यत्तु शब्दानित्यत्वे प्रमाणं वदेति मध्यस्थनियोगे न विशिष्टे प्रमाणाभिधाविषयो, न प्रमाणमात्रविषयो, न च विशेषणमनभिधानविशिष्टं शक्याभिधानमिति प्रतिज्ञावश्यकीति। तन्न। तर्हि प्रतिज्ञानभिधायिनः सौगतस्य नियोगाकरणेनैव निग्रहे तेन सह कथानुपपत्तेः। तस्मादनुमितिसामग्री यथा संपद्यते तथा वक्तव्यमिति स्थेयनियोगान्न नियोगानुरोधेन प्रतिज्ञा किन्तु सम्प्रदायव्यवस्थावशात्। साध्यवचनं विना च न हेत्वाद्यभिधानमिति प्रतिज्ञा साधनाङ्गम्। एतेन स्वस्वमतेन वाच्यमिति स्थेयनियोगादेव न निग्रह इत्युक्तावपि न क्षतिरिति॥

साध्यनिर्देशोत्तरं कुत इत्याकाङ्क्षायां हेतुविभक्त्यन्तलिङ्गवचनमेवोचितं तदैवाकाङ्क्षानिवृत्तेः। उक्ते च हेतौ कथमस्य गमकत्वमित्याकाङ्क्षायामुदाहरणाद्यवतार इति प्रतिज्ञोत्तरं हेतुलक्षणाय सूत्रम्—

उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः॥
न्या० सू० १।१।३४॥

अत्र साधर्म्यपदश्रवणाद्धेतुपदस्यान्वयिहेतुपरत्वाद् विशेषलक्षणमेव सौत्रं, सामान्यलक्षणं विभागश्चार्थे। ताभ्यां विना विशेषलक्षणानुपपत्तेः। सामान्यलक्षणं च साध्यतावच्छेदकमात्रा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वच्छिन्नविशेष्यताकस्वार्थविशेषणकशब्दबोधहेतुन्यायावयवत्वम् । मात्रपदोपादानात् प्रमेयत्वपक्षकप्रमेयत्वसाध्यकोपनयान्वितस्वार्थबोधके निगमने नातिव्याप्तिः । अस्ति च हेत्ववयवे प्रतिज्ञोपस्थितशुद्धसाध्यान्वितस्वार्थबोधकत्वमिति ।

हेतुर्द्विविधः केवलान्वयी केवलव्यतिरेकी चेति विभागः । अन्वयव्यतिरेकिभेदात् त्रैविध्यमिति संप्रदायः । एकदा व्याप्तित्रयानुदाहरणाच्चिन्त्यमेतत् । प्रतीतान्वयसहचारमात्रहेतुवचनं केवलान्वयि, प्रतीतव्यतिरेकसहचारमात्रकहेतुवचनं केवलव्यतिरेकि, प्रतीतोभयसहचारकहेतुवचनमन्वयव्यतिरेकीत्याचार्यानुसारिणः ।

उदाहरणसाधर्म्यादिति पूर्ववदिग्लक्षणा पञ्चमी । साधर्म्यं तदभिधानं साध्यसाधनं साध्यान्वितस्वार्थबोधकोऽवयवः । तथान्वयव्याप्त्यभिधायकोदाहरणप्राग्वर्त्ती निरुक्तसाध्यान्वितस्वार्थबोधकोऽवयवोऽन्वयी हेतुरिति फलितम् । सांप्रदायिकास्तु उदाहियत इत्युदाहरणं दृष्टन्तः, साध्यस्य सिद्ध्यर्हस्य पक्षस्य साधनं तद्वचनम् । तथा च समानधर्म्मस्य सिद्ध्यर्हपक्षस्य हेतुवचनमित्यर्थः । एवं च पक्षसत्त्वसपक्षसत्त्वाबाधितत्वासत्प्रतिपक्षितत्वानिदर्शितानिबाधितसत्प्रतिपक्षितयोः सिद्ध्यर्हत्वाभावादित्थं च विपक्षासत्वस्य विशेषतोऽनभिधानाद्धेतोः सद्विपक्षत्वलाभेन चतूरूपोपपन्नासद्विपक्षहेतुप्रतिपादको हेत्ववयवः केवलान्वयी। एवं सपक्षसत्त्वविनिर्मुक्तचतूरूपोपपन्नहेतुप्रतिपादको हेत्ववयवः केवलव्यतिरेकीत्यग्रे वाच्यमित्याहुः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत्तु पञ्चम्यन्तलाक्षणिकपदवदवयवत्वं सामान्यलक्षणम्। वृक्षादपैति पततीत्यादौ विभागे वृक्षाद् विभजत इत्यादावधित्वेऽवधिमत्वे वा पञ्चम्याः शक्तिर्लाघवात्। हेतुत्वादौ तु लक्षणेति। लाक्षणिकपञ्चमीपदवत्त्वं निगमनेऽपीत्यतः पञ्चम्यन्तेति। न च पञ्चम्यन्तं तत्पदमपि तादृशपर्व्वतज्ञाने लाक्षणिकमेव शक्त्या प्रक्रान्तपर्वतस्यैव बोधनसम्भवादिति वाच्यम्। तत्पदस्य बुद्धिस्थमात्रवाचितया तादृशपर्वतज्ञानस्यापि शक्त्या बोधनसम्भवात्। पर्व्वतो वह्निसामग्रीमान् तस्मादित्या(? + दि-)कं तु न न्यायप्रयोगः सम्प्रदायविरोधादिति नाव्याप्तिः। न च प्रतिज्ञायामपि वह्न्यादिपदे हेतुत्वस्यानुरोधात्तज्ज्ञाने लक्षणेति पञ्चम्यन्तानुपादाने प्रतिज्ञायामप्यतिव्याप्तिः। पञ्चम्या ज्ञापकत्वे ज्ञाप्यत्वे वा लक्षणयैवोपपत्तौ तत्र लक्षणायां मानाभावात्। उक्तं हि। यतो द्रव्यं गुणा इत्यत्र हेतुत्वं यथासम्भवमुत्पादकत्वं ज्ञापकत्वं चेति। इत्थं च हेतुमत्त्वेऽपि पञ्चम्याः शक्तावपि ज्ञाप्यत्वे लक्षणैव। न च धूमादालोकवान् पर्व्वतो वह्निमान्, धूमाद्वह्निमतः सधर्म्मा पर्व्वतो वह्निमानित्यादिप्रतिज्ञायां पर्वतो धूमाद्वह्निमानित्यादौ तत्रत्यनिगमने चातिव्याप्तिरिति वाच्यम्। प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितप्रकृतसाध्यान्वितस्वार्थबोधकपञ्चम्यन्तलाक्षणिकपदवदवयवत्वस्य विवक्षितत्वात्। न चायमात्मा ज्ञानादित्यादावव्याप्तिस्तत्र शक्त्यैव ज्ञानोपस्थितिसम्भवेन लक्षणाविरहादिति वाच्यम्। यद्विषयकज्ञानत्वावच्छिन्नस्य हेतुत्वादिकमनवगतं तस्य व्याप्त्यादिजिज्ञासायामुदाहरणादिप्रयोगनियमाज्ज्ञानविषयत्वेनोप-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थित्यर्थं लक्षणाध्रौव्यात् । अन्यथा तत्र सुखादावपि व्याप्त्युपदर्शनप्रसङ्गादिति ।

तन्न । पञ्चम्या ज्ञानज्ञाप्यत्वे लक्षणयैवोपपत्तौ पञ्चम्यन्तपदे लक्षणाविरहादाकाङ्क्षावैचित्र्याच्च पदार्थैकदेशेऽपि ज्ञाने प्रातिपदिकार्थो विषयत्वेनान्वेति । कृदर्थकृताविव धात्वर्थः । यद्धर्म्मविशिष्टश्च पञ्चम्यन्तपदार्थस्तद्धर्म्मस्य च व्याप्तिरुपदर्श्यते । अन्यथा यथार्थं धूमज्ञानादित्यादिप्रयोगेऽपि धूमादेर्व्याप्त्युपदर्शनापत्तेरिति नव्याः । कथायां धूमादित्यादि प्रयोक्तव्यं, न तु धूमवत्त्वादिति मतुपो वैयर्थ्यात् । यत्तु गुणाद्यन्यत्वे सति सत्त्वादित्याद्यपार्थकं सत्यन्तस्य विभक्त्यन्तरावरुद्धतया पञ्चम्यर्थहेतुत्वेनानन्वयादिति । तदसत् । सत्यन्तार्थान्विते हेतुत्वान्वयसम्भवात् । चैत्रस्य गामानयेत्यादिवदिति दिक् ॥

व्यतिरेकिहेतुं लक्षयति—

तथा वैधर्म्यात् ॥ न्या०सू०॥१।१।३५॥

साध्यसाधनमित्यनुषज्यते । व्यतिरेकिहेतुरिति शेषः । तथावैधर्म्यमुदाहरणवैधर्म्याभिधानम् । वैधर्म्यज्ञापकोदाहरणमिति यावत् । वैधर्म्ये व्यतिरेकव्याप्तिः । पञ्चमी पूर्ववत् । तथा च व्यतिरेकव्याप्तिबोधकोदाहरणप्राग्वर्त्ती निरुक्तसाध्यान्वितस्वार्थकोऽवयवो व्यतिरेकिहेतुरिति फलितम् ॥

हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षायां व्याप्तिपक्षधर्म्मतयोरुपदर्शनप्राप्तौ व्याप्तेस्तृतीयलिङ्गपरामर्शे प्रथमं ज्ञानापेक्षणा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्तत्प्रदर्शनायोदाहरणम्। तल्लक्षयति—

साध्यसाधर्म्यात्तद्धर्म्मभावी दृष्टान्त उदाहरणम्॥ न्या०सू०।१।१।३६॥

साधर्म्यपदश्रवणादुदाहरणमन्वयि। उदाहरणमिति लक्ष्यनिर्देशः। सामान्यलक्षणविभागावार्थौ। यत्तु दृष्टान्त उदाहरणमित्यावृत्तेः सामान्यलक्षणलाभ इति। तन्न। अर्थलभ्यस्य सूत्रेणानिर्देशात्। सामान्यलक्षणं च व्याप्यत्वाभिमतवद्विशेष्यकव्यापकत्वाभिमतबोधहेतुन्यायावयवत्वम्। व्यतिरेकिणि साध्याभावसाधनाभावौ। इतरान्वितस्वार्थाबोधकन्यायावयवत्वं वा तत्। उदाहरणस्य केनाप्याकाङ्क्षाविरहात्तत्त्वम्।

अन्वय्युदाहरणलक्षणमाह। साध्येति। साध्यं पक्षस्तस्य साधर्म्म्यं साधनम्। पञ्चम्यर्थः प्रत्युक्तत्वं व्यापकत्वरूपम्। तद्धर्म्मः पक्षधर्म्मः साध्यं तस्य भावो भवनं संबन्धस्तद्वान्। दृष्टान्तस्तद्बोधकं वाक्यं दृष्टान्तस्य महानसादेरवयवत्वाभावात्। साधनव्यापकतया तद्धर्म्मसाध्यं भावयति बोधयतीति तद्धर्मभावी दृष्टान्तस्तद्बोधकावयव इत्यन्ये। अर्थस्तुल्यः। तथा च साधनवद्विशेष्यकसाधनव्यापकसाध्यबोधहेतुदृष्टान्तबोधकन्यायावयवत्वं तत्त्वम्। दृष्टान्तबोधकेति क्वाचित्कं सम्पातायातं, दृष्टान्तप्रयोगस्य समयबन्धाधीनतया सार्वत्रिकत्वाभावात् लक्षणे व्यर्थत्वाच्च। उपनयवारणा(+-य) साधारण(=? साधन-) वद्विशेष्यकेति। अत्र यो यो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धूमवान् सोऽग्निमानित्युदाहरणे वीप्सया व्यापकत्वबोधनान्न लक्षणासंगतिः ।

अत्र मणिकृतः । यत्र सामानाधिकरण्यमात्रं व्याप्तिस्तत्र केवलान्वयिन्ययमेतदभिन्न एतद्व्यक्तित्वादित्यभेदानुमाने च न वीप्सा । किंचानेकव्यक्त्युपस्थापनसमर्थया वीप्सया साधनाधिकरणद्वित्रिव्यक्त्युपस्थापनेऽपि साधनाधिकरणव्यक्त्यन्तरे व्यभिचारसंशयस्तदवस्थो वीप्सया तात्पर्यग्रहात् । लक्षणया व्याप्तिबोधाङ्गीकारे त्वेकयत्पदादपि तत्सम्भव इति वीप्सा न प्रयोक्तव्यैव । सम्प्रदायादिवशाद्वीप्साप्रयोगेऽपि यत्पद एव वीप्सा न तु तत्पदे । यत्पदाभ्यां विरूपोपस्थितयोरप्येकेन तत्पदेन परामर्शसम्भवात् । 'यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे' इत्यादाविव वीप्सायां प्राथम्यस्य तन्त्रत्वात् । तत्तत्कर्म्म कृतमित्यादौ तत्पदेऽपि वीप्सा । यत्र तूभयत्र वीप्सा तत्र नानुपपत्तिलेशोऽपि । परन्तु परार्थस्थले न युक्तेति नोदाहरणादौ तथेत्याहुः ।

तच्चिन्त्यम् । सामानाधिकरण्यमात्रस्य व्याप्तित्वाभावाद्व्यतिरेकिसाधारण्याय व्यापकसामानाधिकरण्यस्यैव तत्त्वात् । साध्यं साधनव्यापकं न वेत्यादिव्यभिचारसंशयस्य सार्वत्रिकत्वात् । शब्देन व्याप्तिबोधे व्यभिचारसंशयस्याकिंचित्करत्वेन तद्वारणार्थमन्यत्रापि वीप्सावैफल्याच्च । न च केवलान्वयित्वाभिज्ञस्य तत्प्रयोगो विफलः प्रतिपाद्यस्य स्वतो व्याप्त्यवगमेऽपि न्यायप्रयोक्तुः स्वकर्त्तव्यत्वेन तत्प्रतिपादनस्यावश्यकत्वात् । अत एवाभेदानुमानेऽपि वीप्सा कार्या । न च हेत्वधिकरणस्यैकत्वात्तत्र तदसंभवः,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवस्थाभेदेनैकस्य पक्षत्वदृष्टान्तत्ववत्तस्यापि सम्भवात्।

अनेकाशेषपरवीप्सायामपि व्यभिचारतादवस्थ्यमिति च तुच्छं, 'नित्यवीप्सयोः' (अष्टाध्यायी ८।१।४) इति सूत्रेण वीप्सायां सुबन्तैकपदस्थाने सुबन्तपदद्वयादेशात्। अत एव यद्यत्तत्तदिति समासमध्ये युज्यते। पदद्वयत्व एकशेषापत्तेः। वीप्सा च प्रयोक्तुर्व्याप्तुं व्याप्तिमत्तया बोधयितुमिच्छा। तथा च तत्तत्पदद्वयसमुदाय एकपदतापन्नः समुदायशक्त्यैव व्याप्तिमुपस्थापयति। अत एवैकपदत्वान्नृभिर्नृभिरित्यादौ नस्य णत्वमाशङ्क्य परिहृतवान्न्यासकारः।

विरूपोपस्थितयोरित्यप्ययुक्तं, यत्पदाभ्यामवयवशक्त्या महानसतदन्यत्वाद्येकरूपेणैव बोधनात्। अन्यथा यद्यद्धूमवदित्यादौ धूमवत्पदावृत्तिः स्यात्। सम्भेदेनान्यतरवैयर्थ्यम्। व्याप्तिबोधार्थं समुदायावश्यकत्वाच्च। अत एव नानावाच्यानां क्रियादिभिर्युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्सेति युगपत्पदमुपात्तं वृत्तिकृता[1]। अत एव न्यासकारोऽप्याह—यदा तु क्रमेण व्याप्तुमिच्छा तदा न भवति। यथायं ग्रामो रम्योऽयं च रम्यः। इत्युपाध्यायाः।

मिश्रास्तु केवलान्वयित्वेन ज्ञातसाध्यके, अयमेतदभिन्न एतद्वृत्तियावद्धर्म्मवत्त्वादित्यादौ च व्याप्तेः सर्वसिद्धायाः साधकताप्रयोग इव वीप्सा न कार्य्या। किंचोदाहरणं नियतसहचारप्रदर्शकतया न तु व्याप्तिग्राहकं न तु व्याप्तिबोधकम्। तथात्वे धूमो वह्निव्याप्य इत्येव ब्रूयात् विशिष्यपक्षधर्मताबोधकोपनय-

[1] Cp. Kāśikā VIII, 1, 4.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वत् । किंच वीप्सायामपि व्याप्तिर्व्युत्पत्तिबलात्प्रत्येतव्या । वीप्सितशब्दश्रवणे द्वितीयपदस्यानुवादतया व्याप्तिबोधप्रयोजकत्वग्रहे प्रथमयत्पदोपस्थाप्यभिन्नं यावदधिकरणं तेन तेन रूपेण तदन्यत्वेन वा रूपेण द्वितीययत्पदेन बोध्यते । तथा च यावद्धूमाधिकरणोपस्थितौ तत्र साध्यवत्त्वग्रहे भवति व्याप्तिधीः । तदेवं व्युत्पत्त्यनादरे पदद्वयेनापि यावदधिकरणोपस्थित्ययोगः, तदादरे तु यद्योगप्राथम्याभ्यामेव व्याप्तितात्पर्यकत्वग्रह एकयत्पदादेव यावद्धेत्वधिकरणोपस्थितिरस्तु किं यत्पदद्वयेनेति मणिकृत्तात्पर्यम् । तदुक्तं प्रमाणपारायणे—यद्योगप्राथम्याभ्यामेव व्याप्तौ लब्धायां वीप्सावधारणे स्फुटार्थ इति ।

यत्तु वीप्सास्थले पदद्वयस्य नोपस्थापकत्वं किन्तु नित्यवीप्सयोरिति सूत्रादिष्टसमुदायस्यैवेति । तन्मन्दम् । आदेशस्य शक्त्यभावेन समुदायस्यानुपस्थापकतयादेशस्मारितैकयत्पदेनैव तावतामुपस्थितिर्वाच्या आदेशस्तु नियततात्पर्यग्राहक इति घट्टकुट्यां प्रभातम् । वीप्सां विनाप्युक्तरीत्या तात्पर्यग्रहादेकयत्पदेनापि तावतामुपस्थितिसम्भवात् । यदि च यत्पदे यद्योगाभाव इत्युच्यते तदास्तु धूमादिपदे वह्न्यादिपदे वा व्याप्यत्वे व्यापकत्वे वा निरूढलक्षणेत्यक्षरतात्पर्याभ्यामाहुः । तच्चिन्त्यम् । यद्योगप्राथम्ये विनापि धूमवति धूमवति वह्निरित्यादौ व्याप्त्यादिबोधात् । सूत्रप्रामाण्ये तत एव यत्पदवीप्सायामपि व्याप्त्यादिबोधात् । यद्योगो हि स वह्निमान् यो धूमवानित्यादौ विनापि प्राथम्यं धूमवत उद्देश्यतासंपादकः । धूमवान् वह्निमानित्यादौ तु प्राथम्यमेव तथा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वय औत्सर्गिक इति संसर्गतया व्याप्तिबोध उभयत्रानियतं तात्पर्यम्। मिलने(?)ऽप्यस्तु तथैव कदाचित्। अस्तु वा संसर्गतया बोधे नियतं तत्। न तु प्रकारतया बोधे। तत्र वीप्सायाः अनुशिष्टत्वात्। आनुशासनिकी च शक्तिर्निरूढलक्षणा वा वीप्सास्थल एवादेशे शक्त्यसत्वेऽपि आदेशिनि तद्वाक्यस्थपदान्तरे वा कल्प्या। नियततात्पर्यस्य वृत्तिनियतत्वात्। अत एव व्याप्तिबोधे वीप्सायाः अयोग्यत्वम्। 'अहरहः सन्ध्यामुपासीत' इत्यादौ प्रत्यवायसिद्धिश्चेति युक्तमुत्पश्यामः।

इदं तु बोध्यम्। यद्यपि धूमवान् वह्निमानित्यादौ वीप्सितशब्दबोध्यतावच्छेदकावच्छिन्नस्य व्यापकत्वं वीप्सितशब्दसमभिव्याहृतशब्दबोध्यतावच्छेदके लभ्यते तथाप्यत्र वीप्सितयत्पदार्थवाचितत्पदबोध्यतावच्छेदकावच्छिन्नस्य व्यापकत्वं तत्पदसमभिव्याहृतशब्दबोध्यतावच्छेदके तल्लभ्यते व्युत्पत्तिभेदात्। तत्पदबोध्यतावच्छेदकं च यद्यपि धूमवन्महानसतादितरत्वादि तथा तथापि प्रकृते धूमवत्त्वमात्रमेव तथेत्यलं विस्तरेण॥

व्यतिरेक्युदाहरणं लक्षयति—

तद्विपर्ययाद्वा विपरीतम्॥ न्या० सू० १।१।३७॥

वाशब्दो दृष्टान्त उदाहरणमित्यस्य समुच्चये। विपरीतमुदाहरणं व्यतिरेक्युदाहरणमिति लक्ष्यनिर्देशः। तद्विपर्ययो व्यतिरेकव्याप्तिः। पञ्चम्यर्थो ज्ञापकत्वम्। तथा च प्रकृतहेतुकप्रकृतसाध्यकव्यतिरेकव्याप्तिप्रतिपादकमुदाहरणं व्यतिरेक्युदाह-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रणम् । यो यो वह्न्यभाववान् स धूमाभाववानिति व्यतिरेक्युदाहरणात् । वह्न्यभावव्यापकत्वस्य धूमाभावे लाभात् तत्प्रतियोगित्वं तुल्यवित्तिवेद्यत्वन्यायेन धूमे लभ्यत इति व्यतिरेकव्याप्तिलाभः ।

वस्तुतो न केवलं साध्यसाधर्म्यात्(?+त्त-)द्धर्म्मभावी दृष्टान्त उदाहरणम्, अपि तु तद्विपर्ययाद्विपरीतमपीति वाशब्दाल्लभ्यते । तद्विपर्ययः साध्यविपर्ययः साध्याभावस्तस्माद्विपरीतमतद्धर्म्मभावि साधनरहितम् । पञ्चम्यर्थो व्यापकत्वम् । तथा च प्रकृतसाध्याभावतद्विशेष्यकसाध्याभावव्यापकसाधनाभावप्रतीतिपरं दृष्टान्तवचनं व्यतिरेक्युदाहरणमिति फलितम् । इदं च व्याप्यव्यापकतदुभयाश्रयविकलानुपदर्शितान्वयव्यतिरेकविपरीतोपदर्शितान्वयव्यतिरेकभेदादाभासरूपम् । व्यतिरेकिणि साध्याभावसाधनाभावयोर्व्याप्यव्यापकत्वे बोध्ये ॥

उदाहरणोत्तरं व्याप्तस्य पक्षधर्मतोपदर्शनायोपनयस्तं लक्षयति—

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥ न्या० सू० १ ।१ । ३८ ॥

उदाहरणापेक्ष उपसंहार इति सामान्यलक्षणम् । उपनय इति लक्ष्यनिर्देशः । उदाहरणप्रयोज्याकाङ्क्षानिवर्तकोऽवयव इत्यर्थः । व्याप्तिरन्वयतो व्यतिरेकतश्च ग्राह्या । स द्विविधोऽन्वयिव्यतिरेकिभेदादिति विभाग आर्थः । तथान्वय्युपनयं लक्षयति । साध्यस्य पक्षस्य तथेत्युपसंहार इति । तथेति न शब्दपरं दृष्टान्तप्रयोगस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सामयिकतया यथाशब्दाभावेऽनन्वयापत्तेः । किन्तु साध्यव्याप्य-हेतुमत्त्वपरम् । उपसंहियतेऽनेनेति उपसंहारो बोधकः । तथा च प्रकृतपक्षे साध्यव्याप्यहेतुमत्त्वबोधकोऽवयव इति फलितम् । व्य-तिरेकिणं लक्षयति । न तथेति । पूर्वोक्तक्रमेण पक्षे साध्याभा-वव्यापकसाधनाभावाभावत्व(=?-साधनाभावत्व·)बोधकोऽवयव इति लभ्यते ।

आचार्यास्तु तथा चायमित्यन्वय्युपनयो, न तथा चायमिति व्यतिरेक्युपनय इत्याहुः । दीधितिकृतस्तु वह्निव्याप्यधूम-वानयमित्याकारो नोपनयो व्याप्याभेदस्य हेतौ हेतुमदभेदस्य पक्षे बोधनाद् व्याप्तिविशिष्टहेतुविशिष्टपक्षस्य चोपनेयत्वात् । किन्तु तद्वान् पक्ष इत्याकारो योग्यतावलात् । तदा साध्यव्याप्यस्य परा-मर्श इत्याहुः ।

तच्चिन्त्यम् । एवमपि निरुक्तहेतुविशिष्टपक्षस्योपनेयत्वासंभ-वात् । तस्मात्कथकसम्प्रदायवलाद्यथोक्त एवोपनयः । कथकतात्प-र्यबलान्न्यूनाधिकांशभानं त्वदोषाय । पर्वत इत्यादावेकत्वादिवत् । दृष्टान्तप्रयोगस्यावश्यकत्वे त्वाचार्यमतमेव युक्तमिति । उदाहरणा-न्त एव प्रयोग इति न युक्तं व्याप्तस्य पक्षधर्मताया इतरावयवा-लभ्यत्वेन परामर्शासम्पत्तेः । न च हेत्ववयवादेरेव तल्लाभस्तस्य हेतुमात्रोपस्थापकतया तत्परत्वाभावात् । हेतुत्वोपस्थापकत्वादिवा-क्यादेव तदाक्षेप इति चेन्न । तदर्थस्यासिद्धत्वेनानाक्षेपकत्वात् । अन्यथा प्रतिज्ञावाक्यादेव सर्वाक्षेपेऽवयवान्तरवैफल्यप्रसङ्गात् । प्रतिपाद्यानां स्वत एव तदवगम इति चेन्न । तेषां व्युत्पन्नाव्यु-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्पन्नतया सर्वत्र तदसम्भवात्, प्रतिपादकेन स्वव्यापारस्य निर्वाह्यत्वाच्चेति ॥

व्याप्तपक्षधर्म्मतोपजीवकत्वान्निगमनस्य तदुपदर्शकोपनयानन्तरं तल्लक्षणाय सूत्रम्—

हेत्वपदेशात्प्रतिज्ञायाश्च पुनर्वचनं निगमनम् ॥
न्या० सू० १ । १ । ३९ ॥

निगमनमिति लक्ष्यनिर्देशः । निगम्यन्तेऽबाधितत्वादिधीद्वारा स्वकार्यसमर्थाः क्रियन्ते प्रतिज्ञादयोऽवयवा अनेनेति । निगमनलक्षणमाह । हेत्वपदेशादिति । हेतुर्व्याप्तिपक्षधर्मतावल्लिङ्गं, व्याप्तिविशिष्टहेतुमत्पक्षो वा । तदपदेशस्तज्ज्ञानज्ञाप्यत्वम् । तेन प्रतिज्ञा तस्य साध्यस्य वचनं पक्षे बोधनम् । निरुक्तज्ञानज्ञाप्यत्वविशिष्टसाध्यवत्पक्षबोधोऽवयव इति फलितम् ।

नन्विदंपदानुषङ्गेणायं तस्माद् वह्निमानिति यदि निगमनं तदा युक्तमेतत्, यदि चोपनयैकवाक्यतयैव पक्षविशेष्यकबोधसंभवे इदंपदानुषङ्गे मानाभावस्तदा कथमेतल्लक्षणसंगतिरिति चेत् । सत्यम् । इतरसहकारेण तादृशबोधजनकत्वस्य वाच्यत्वेनादोषात् । वस्तुतोऽवयवार्थविशेष्यकस्वार्थविशिष्टबोधकावयवत्वं लक्षणमप्रत्यूहम् । हेत्ववयवार्थविशेष्यः प्रतिज्ञैकदेशार्थो न तु प्रतिज्ञार्थ इत्यदोषः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ननु प्रतिज्ञार्थस्य हेत्वाद्याकाङ्क्षाया उपनयान्तेनैव निवृत्तौ निगमनमनाकाङ्क्षिताभिधानम्। आकाङ्क्षा ह्यभिधानापर्यवसानेन यथा द्वारमित्यत्र। क्वचिदभिधेयापर्यवसानेन 'विश्वजिता यजेत' इत्यादौ। न चैतदुभयसंभवः। न च विपरीतशङ्कानिवृत्तिं विना कथं प्रतिज्ञार्थपर्यवसानम्, उपनयादेव तन्निवृत्तेः। नहि तद्विशेषदर्शनतामनादृत्य निगमनं तन्निवर्तकम्। सिद्धनिर्देशतया निवर्त्तयतीति चेन्न। साध्यस्वरूपमात्राभिधानात्। सिद्धत्वेनोक्तौ तस्मादिति हेत्वर्थानन्वयप्रसङ्गात्। तदन्वयबलादेव हेत्वनपेक्षत्वरूपसिद्धत्वलाभादिति चेन्न। व्याप्तिपक्षधर्मज्ञानेऽप्यबाधितासत्प्रतिपक्षितत्वाज्ञानेऽनुमित्यनुत्पत्तेः। निगमनात् कुतस्तज्ज्ञानमिति चेत्, पूर्वसाध्यतयोक्तस्य पुनर्विशिष्टहेतुसंबन्धेनोत्कीर्त्तनस्य तज्ज्ञापकतयैव साफल्यात्। तदुक्तमाचार्यैः—उपसंहारस्यैव गुणो विपरीतशङ्कापनयनं नामेति। तथा च साध्यपदेऽबाधितत्वादिविशिष्टे लक्षणा। अस्तु वा विशिष्टहेतुज्ञानज्ञापकत्वेनाक्षेपात्तल्लाभः।

अथ बाधसत्प्रतिपक्षनिश्चयाभावः स्वरूपसन्नेव हेतुर्न तु तदभावज्ञानमिति किं तदभावज्ञापनेनेति चेन्न। यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः। अयोग्यत्वाभावज्ञानसाध्यशाब्दज्ञानवत्। वस्तुत उत्पन्नानुमितौ बाधितविषयकत्वादिशङ्कायाः प्रामाण्यशङ्काव्युदासायाबाधितत्वादिज्ञापनं कथकसंप्रदायसिद्धमावश्यकम्। अन्यथा न्यूनत्वेनापसिद्धान्तेन च निग्रहापत्तेः। अत एव स्वस्वसिद्धान्तानुसारेण मीमांसकैर-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वयवत्रयं, बौद्धैर्द्वयमेवोद्भाव्यम्। कदाचित्समयबन्धबलादेकोऽपि नोद्भाव्य इति युक्तम् ।

आचार्यास्तु प्रागुक्ताशेषरूपविशिष्टपरामर्शाय तस्मादिति सर्वनाम्ना हेतुनिर्देशवत्साध्यस्यापि विवक्षिताशेषरूपलाभाय तथेति सर्वनाम्ना निर्देशः सिद्धस्थलभावविरोधिनोर्बाधसत्प्रतिपक्षयोर्निरासाय युक्तः । न च तथेति तत्पदेनैतन्मतसिद्धतथाचायमित्युपनयस्थतत्पदार्थपरामर्शेन हेतुमानित्यर्थे हेतुमत्त्वाद्धेतुमत्त्वमित्यनन्वयः, योग्यतावलात्तेन प्रतिज्ञास्थसाध्यपदार्थपरामर्शात्, तव तस्मादिति तत्पदेनोपनयार्थपरामर्शवादित्याहुः। तन्न। बहूनां प्रक्रम एकस्य परामर्शे विनिगमकाभावात्, वादिवाक्ये योग्यतयान्वयेऽतिप्रसङ्गात्। तस्मादित्यत्र तु विभक्त्यर्थान्वयबलादेव नियम इति मणिकृतः। वस्तुतो दृष्टान्तस्य प्रयोगे वा (=? दृष्टान्तस्य प्रयोगेण) तथा चायमित्युपनयस्थतत्पदेन साध्यहेत्वोर्द्वयोरेव तुल्यतया परामर्श (=?-र्शे) निगमनवैयर्थ्यमित्यलं विस्तरेण ॥

॥ इति न्यायप्रकरणम् ॥

न्यायप्रकरणोत्तरं तदुत्तराङ्गप्रकरणम् । निरूपिते हि न्याये तदुत्तराङ्गजिज्ञासोदयात् । यद्यपि तर्को नोत्तराङ्गं न्यायविषयपरिशोधकतया पूर्वाङ्गत्वात्, निर्णयस्त्वङ्गमेव न स्वोत्पत्तौ स्वस्यानङ्गत्वात्, तथापि न्यायस्य निर्णये साध्ये विशिष्टलिङ्गोपस्थिति-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दूरम्। सा तर्केण व्यभिचारशङ्कापनय एव। किंच तर्केणाहार्य-शङ्कासामग्रीविघ(+?-ट-)न एव निर्णयः संभवतीति भवत्युत्तराङ्गम्। आत्मादिगोचरन्यायेन च मोक्षादिसाधनगोचरप्रवृत्तिफले जनयितव्ये तन्निर्णयोऽपेक्षित इति सोऽप्यङ्गम्। तत्र तर्कस्य निर्णयहेतुत्वादादौ तर्कलक्षणाय सूत्रम्—

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः॥ न्या० सू० १। १। ४०॥

तर्क इति लक्ष्यस्य निर्देशः। तर्क्यतेऽनेनेति व्युत्पत्त्या करणपरत्वेऽपि तर्कणं तर्क इति व्युत्पत्त्या फलपरत्वात्। शेषं लक्षणस्य। तत्रोह इत्येतावन्मात्रं ज्ञानमात्रे गतमतः कारणेति। कारणं व्याप्यं तस्योपपत्तिराहार्यारोपस्तत ऊहो व्यापकस्याहार्यारोप इत्यर्थः। तर्कस्य प्रयोजनमाह। अविज्ञातेति। न विशेषतो ज्ञातं तत्त्वं यस्य तस्मिन्। तत्त्वज्ञानार्थं तत्त्वनिर्णयार्थमित्यर्थः। न विज्ञातं तत्त्वं येनेति पुरुषपरत्वभ्रमनिरासार्थमर्थ इति।

अथ तर्कत्वं न जातिर्मानाभावात्। न च तर्कयामीति प्रतीतिर्मानं तस्या उभयवादिसिद्धोपाधिविषयत्वेनैवोपपत्तेः। स चापादकांशे आहार्यापाद्यव्याप्यापादकवत्तानिश्चयत्वावच्छिन्नजन्यत्वम्। अस्ति हि निर्धूमः स्यादित्यापत्तिं प्रति निर्धूमत्व-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याप्यनिर्वह्नित्ववानित्याहार्यारोपत्वेन कारणत्वम् । आपाद्यबाधबुद्धिसहकारेणापाद्यव्याप्यापादकवत्ताज्ञानत्वावच्छिन्नजन्यज्ञानत्वं वा तत् । अस्ति हि निरुक्तापत्तिं प्रति पर्वतो धूमवानित्यापाद्यबाधधियोऽपि हेतुत्वम् । एतन्मत आपादकस्यानाहार्यसंशयात्तादृशनिश्चयादप्यापाद्यबाधबुद्धीच्छासहकृतादापत्तिसंभवेऽपि न क्षतिः । संशयोत्तरं यदि निर्वह्नित्ववान् स्यादिति निश्चयादेवाहार्यात्तत्रापत्तिरित्यपि वदन्तीति चेन्न । अननुसंहितनिरुक्तोपाधेरपि निर्धूमत्वमिहापादितमित्यनुभवात् । उक्तोपाध्योर्व्याप्त्यादिभेदभिन्नतयाननुगमाच्च । किंचैवमनुमितित्वादेरपि विलयः स्यादिति । न च तर्कत्वस्य चाक्षुषत्वादिना सांकर्यं तस्य मानसत्वव्याप्यत्वात् ।

अथ मास्तु जातिमात्रमनुगतप्रतीतिर्भ्रान्तैवेति पाषण्डा इति चेन्न । एवमनुभवापलापे घटादेर्बाह्यमात्रस्यापलापापत्तेः । अयं घटोऽयं पट इत्यादिप्रतीतीनां वैलक्षण्यं तु स्वस्वरूपभेदादेवेति योगाचारमतमेव युज्यते । वस्तुतो बाह्यानादरे विज्ञानसिद्धिरपि दुर्घटेति शून्यवादिनो दिगम्बरस्य मतमेव मतं स्यात् । तस्मादनुभवसिद्धपदार्थापलापो न युक्त इति तर्कत्वसिद्धिरपि दुर्वारा । यत्तु अनुमितित्वव्याप्यत्वं तस्याहार्यानाहार्यसाधारणव्याप्यवत्ताज्ञानत्वेन व्यापकानुमितित्वावच्छिन्न आपाद्यबाधबुद्धीच्छयोराहार्यानुमितित्वावच्छिन्ने हेतुत्वे लाघवादिति । तन्न । आपत्तावनुमिनोमीति प्रत्ययापत्तेः । अनाहार्यानुमितित्वस्य तद्विषयत्वेन स्वीकारे तदवच्छिन्ने पृथक्सामग्रीक-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ल्पने चातिगौरवम्। अन्यथा निर्धूमत्वव्याप्यनिर्वह्नित्ववान् स्यादित्यतोऽपीच्छादिविरहेऽनुमित्यापत्तेः। व्यापकानुमितित्वे मानाभावश्चेति दिक्।

अथ तथापि तर्कस्य न स्वातन्त्र्येण निर्णयफलत्वं प्रमाणत्वाभावात्, नापि प्रमाणसहकारितया तत्तत्प्रमाणादेव निश्चयसंभवे तस्य तत्सहकारित्वे मानाभावात्। न च व्यभिचारशङ्कापनायकतया तदुपयोग इत्युक्तं धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्यादितर्कानुकूलापाद्यबाधबुद्धेरेव तत्संभवात्। इति चेन्न। आहार्यशङ्काया अनिष्टापदर्शकतर्केणैव जिज्ञासां विघटयता निवृत्तेः स्वीकारात्। आहार्यशङ्कासामान्या हीच्छाघटिततया निश्चयविरोधित्वम्। न चाहार्यसंशयस्यापि निश्चयत्वमनाहार्यतदभावप्रकारकान्यत्वस्यैव निश्चयत्वघटकत्वादिति वाच्यम्। तर्ह्येककोट्यंशे भ्रमत्वनिश्चयेऽनाहार्यसंशयस्यापि निश्चयत्वस्वीकारापत्तेः। न चेष्टापत्तिः। तदभावाप्रकारकत्वस्यैव लघुतया निश्चयत्वघटकत्वात्। अत एव तर्कस्यानुमितौ तदधीनप्रवृत्तौ चोपयोगिनो निर्वह्निः स्यान्निर्धूमः स्यादित्यादेर्विषयपरिशोधकत्वमुच्यते। आहार्यशङ्काया अनुमितौ प्रवृत्तौ च विरोधिन्या अपनायकत्वात्। कथमेतदिति चेत्तर्कोत्तरनिर्वह्नित्वादिज्ञानस्य निर्धूमत्वादिज्ञानरूपानिष्टसाधनत्वज्ञानेनेच्छाविघटनात्। कथं तादृशानिष्टसाधनत्वज्ञानमिति। अन्वयव्यतिरेकानुविधानात्। अत एव तदुत्तरं यदि निर्वह्निः स्यान्निर्धूमः स्यादि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्युल्लेखः । 'यदि धनं मत्तता नूनम्' इत्यादौ यदि शब्दस्य कार्यकारणभाववोधकत्वात् ।

वस्तुत आपत्तेराहार्यानाहार्यसाधारणापादकविशिष्टज्ञानमात्रे साक्षादेव विरोधित्वादापादकशङ्कानिवृत्तिरिति स्यादित्यनेन बोधितस्यारोपविषयनिर्वह्नित्वसंबन्धस्य तादृशनिर्धूमत्वसंबन्धस्य च पौर्वापर्यलब्धेराक्षेपात्तदेति लाभात् । तत्त्वबोधकृतस्तु—अव्यवस्थिताभ्युपगम्यमानकोट्युपाधिकानिष्टसत्त्वप्रतिसंधानं तर्कः । तच्चोपाधिकत्वं च तस्मिन् सत्यावश्यकत्वम् । तथाहि शब्दो यद्यनित्यो न स्यात् कार्यो न स्यादित्यादौ यदिशब्देन समभिव्याहृतकोटेरव्यवस्थितत्वं परिगृहीतत्वं चोच्यते । यदाहुराचार्याः—अनियतकोट्युपनिपाते नियतकोटिपरिग्रहस्य यद्यर्थत्वम् । इत्याहुः ।

तर्क इष्टापत्तिर्मूलशैथिल्यं विपर्ययापर्यवसानं चेति त्रयो दोषाः । तत्रेष्टापत्तौ विपर्ययेऽसिद्धिरित्येके । तन्न । विपर्ययो हि तर्कोत्तरवार्त्तोपादकाभावनिश्चयः । स च क्वचिदापाद्याभावरूपलिङ्गालिङ्गान्तराद्वानुमितिरूपः । अनुमितिसामग्र्यसत्त्वे प्रत्यक्षादिरूपः । तर्ककाले यत् प्रमाणं संभृतसामग्रीकं तत एव विपर्ययोत्पत्तेः । तथा चापाद्याभावस्यासिद्धत्वेऽपि लिङ्गान्तरानुमितिरूपः प्रत्यक्षाद्यात्मको वा विपर्ययः सुघट इति । निर्धूमत्वादिज्ञाने द्वेषासंभवस्तद्बीजमित्यन्ये । आपाद्यबाधधियस्तर्कहेतुत्वात् कारणविघटनमिति तु तत्त्वम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मूलशैथिल्यं तर्कमूलव्याप्तिग्राहकमानाप्रवृत्तिः।

विपर्ययापर्यवसानं च तर्कस्य तत्कोटिमात्रविषयकविपर्ययाप्रयोजकत्वम्। तादृशविपर्ययकतर्कस्यैव तदभावकोटिकशङ्कानिवर्तकत्वात्। अन्यथा धूमो यदि वह्निजन्यत्वतदितरजन्यत्वान्यतरवान्न स्यादित्यादितर्कस्यापि वह्निजन्यत्वशङ्कानिवर्त्तकत्वापत्तेः।

तादृशो विपर्ययः क्वचिद्विशेषतो व्याप्त्या। यथा धूमो यदि वह्निजन्यो न स्याद्वह्न्यन्वयव्यतिरेकानुविधायी न स्यादित्यत्र। सामान्यतोऽपि क्वचित् पक्षधर्मतावलात्। यथा धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निजन्यो न स्याज्जन्यो न स्यादित्यत्र।

विशिष्टाभावग्राहकादपि। विशेषणत्वे न निश्चिते विशेष्याभावमात्रसिद्धेरुपगमात्। तदयं निष्कर्षः। विशिष्टधर्मावच्छिन्नापादकापत्तेर्विशेषणविशिष्टे पक्षे विशेष्यशङ्कानिवर्त्तकत्वं, विशेष्यविशिष्टे पक्षे तु विशेषणस्य। यथा सामान्यं यदि गुणकर्म्मान्यत्वे सति सत्तावद्द्रव्यं स्याद्, गुणो यदि तादृशसत्तावान् स्याद् द्रव्यं स्यादित्यत्र च। वस्तुतस्तद्धर्मावच्छिन्नापादकापत्तेस्तद्धर्मावच्छिन्नशङ्कानिवर्त्तकत्वमित्येवन्याय्यः। अन्यथा निरुक्तापत्तिद्वयाद् विशिष्टशङ्कानिवृत्त्यनापत्तेः। विशेष्यादिशङ्कानिवृत्तिस्तु तन्मात्रापादकतर्कान्तरादेवाभूत्। अन्यथा विशेषणादिविशिष्टे विशिष्टाभावनिश्चयस्यापि विशेष्यादिशङ्कानिवर्त्तकत्वापत्तेरिति दिक्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स चायमात्माश्रयेतरेतराश्रयचक्रकानवस्थाप्रमाणबाधितार्थप्रसङ्गभेदेन पञ्चविधः । अन्येषामन्तर्भावसम्भवेऽपि गोवृषन्यायेन शास्त्रे विभागः । तत्र स्वस्य स्वापेक्षायामनिष्टप्रसङ्ग आत्माश्रयः । अपेक्षा च ज्ञप्तावुत्पत्तौ स्थितौ च । अत्राद्यः । यथा । एतद्घटज्ञानं यदि एतद्घटज्ञानजन्यं स्यादेतद्घटज्ञानाभिन्नं स्यात् । न च निर्विकल्पकादिजन्ये सविकल्पकादौ मूलशैथिल्यम् , एतद्घटज्ञानत्वं यद्येतद्घटज्ञानजन्यतावच्छेदकं स्यादेतद्घटज्ञानत्वं न स्याद् एतद्घटविशिष्टज्ञानत्वादिवदित्यत्र तात्पर्यात् । यथा घटो यदि घटजन्यः स्यात् । न चोभयत्रैवाद्याभावेनापादकाभावसाधनेऽसाधारण्यं, व्यापकाभावमुद्रया गमकत्वे तस्यादोषत्वात् । यथा यद्ययं घट एतद्घटवृत्तिः स्यात् तर्ह्येन प्रमीयेत । मेयत्वादावयं न दोषस्तत्र स्ववृत्तिप्रमाया इष्टत्वात् ।

स्वापेक्षापेक्षित्वनिबन्धनः स्वस्यानिष्टप्रसङ्गोऽन्योन्याश्रयः । यथाऽयं घटो यद्येतद्घटजन्यजन्यः स्यादेतद्घटभिन्नः स्यात् । चक्रके जन्यमेकं वर्द्धनीयम् । स्वापेक्षापेक्षापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गश्चक्रकम् । एतदुभयमपि ज्ञप्त्यादिभेदात्त्रिविधम् । चक्रके त्रित्वमविवक्षितं चतुराद्यपेक्षायामपि तत्त्वात् । न चान्योन्याश्रयादावात्माश्रयस्य नियतत्वादावश्यकतया स एव दोषोऽस्त्विति वाच्यम् । साक्षात्स्वापेक्षित्वस्यात्माश्रयत्वात् । परम्परापेक्षायां तदुपगमे परम्पराज्ञानार्थं प्रथमोपस्थितस्यान्योन्याश्रयादेरेव दोषत्वाच्च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

प्रमाणरहितानन्तप्रवाहापत्तिमूलकोऽनिष्टप्रसङ्गोऽनवस्था । ब्राह्मणत्वं यदि ब्राह्मणत्वावच्छिन्नजनकतावच्छेदकं स्याद् ब्राह्मणप्राक्कालवृत्तिभेदप्रतियोगितावच्छेदकतावच्छेदकं न स्यादित्यादि । निरुक्तान्यप्रसङ्ग(?+:)प्रमाणबाधितार्थप्रसङ्गः । यथा ह्रदो यदि धूमवान् स्याद् वह्निमान् स्यादित्यादि ।

उत्सर्गाविनिगमलाघवगौरवप्रतिबन्धानौचित्यानि तु न तर्कः । उत्सर्गो हि बाधकापेक्षो नियमः फलतो भूयःसाहचर्यम् । यथा धियां प्रामाण्यशब्दानां मुख्यार्थपरत्वमित्यादि। स प्रसङ्गानात्मकत्वान्न तर्कः । अविनिगमो युगपदुपस्थितयोरन्यतरप्रतिक्षेपेणान्यतरावधारणाभावः । स च प्रमाणाभावपर्यवसायी न तर्कः । लाघवगौरवं तु न तर्कः । किन्तु लाघवज्ञानं प्रमाणस्य सहकारि, गौरवज्ञानं तु तद्विरोधि । अनौचित्यं तु औचित्यस्य प्रामाणिकस्य विरहः प्रमाणाभावान्तर्गतः । नचार्थान्तरमर्थान्तरेण वाद्युक्तेन स्थेयानुमतेन कथाविच्छेदे द्वितीयार्थान्तरोक्तेरनवसरपराहतत्वादिति दिक् ॥

निर्णयस्य सतर्कप्रमाणफलत्वात्तदनन्तरमुद्देशक्रमात्तल्लक्षणाय सूत्रम्—

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥

न्या० सू० १ । १ । ४१ ॥

विमृश्य विमर्शं संशयं कृत्वा स्थितपक्षप्रतिपक्षाभ्यां यदर्थावधारणं स निर्णयः । विमृश्येति श्रवणात् संशयपूर्वको निर्ण-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

योऽत्र लक्ष्यः । निर्णयसामान्यलक्षणं, संशयपूर्वकस्तदपूर्वकश्चेति विभागश्चार्थलभ्योऽपि संशयोऽत्र कथास्थलीयो ग्राह्यः । अन्यथा लक्षणे पक्षप्रतिपक्षाभ्यामित्यस्य वैफल्यापत्तेः ।

पक्षः स्वपक्षदूषणनिराकरणं, प्रतिपक्ष (?+:) परपक्षदूषणोद्भावनम् । वादजल्पयोरुभयम् । वितण्डायामन्त्यमेव । संशयोऽपि वादे स्वारसिकोऽस्वारसिकश्च । जल्पवितण्डयोः स्वारसिक एव । वादिनोः स्वस्वमतनिर्णयसत्त्वादाहार्यस्यैव सम्भवात् । सन्दिग्धस्य वादिनः स्वारसिकोऽपि सम्भवति । वादे वादिगत एव । जल्पवितण्डयोस्त्वनुविधेयगतः, तत्संशयस्य कथाप्रवर्त्तकत्वात् । तदभावे कथकशक्त्यशक्तिविषयः । स्थेयगतो ग्राह्य इत्यन्ये । विप्रतिपत्तिवाक्यजसंशयस्य न्यायाङ्गत्वान्नेदं युक्तम् । तद्वाक्यस्यापि तत्र तात्पर्यमित्यन्ये । इति संक्षेपः ॥

इति श्रीजयरामेण प्रथमप्रथमाह्निकम् ।
विवेचितं विवेकेन सुधियामस्तु तुष्टये ॥



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमाह्निकेन सपरिकरे पञ्चावयवात्मके न्याये लक्षिते सपरिकरन्यायस्य च तदुपालम्भपरवादाद्युपजीव्यतयोपजीव्योपजीवकभावसङ्गत्या तदुपालम्भपरवादादिलक्षकद्वितीयाह्निकमधुना निरूप्यम्। न च निग्रहादेरपि निर्णयादिफलकत्वेन न्यायपरिकरतया द्वितीयेन प्रथमस्य संकरः, न्यायस्याप्युपालम्भपरतया प्रथमेन च द्वितीयस्य स इति वाच्यम् । सपरिकरन्यायतदवयवादिलक्षणस्य प्रथमाह्निकार्थत्वात् । न्यायतदवयवादिलक्षण इति निग्रहस्थानविशेषलक्षणोभयभिन्नपदार्थलक्षणस्य च द्वितीयाह्निकार्थत्वात् । अत्र च हेत्वाभासानां साधनदूषणपरवचनसन्दर्भरूपकथैकदेशतया कथायाः प्राधान्यादादौ तल्लक्षणप्रकरणम् । तत्राप्येतच्छास्त्रोद्देश्यतत्त्वज्ञानसाक्षादुपायतया वादस्य प्राधान्यादादौ तं लक्षयति--

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥

न्या०सू०१।२।१॥

अत्र कथासामान्यलक्षणं विभागश्चाक्षेपलभ्यः । न च कथासामान्यलक्षणं सूत्रकृतो नाभिमतम् । तथा सति वादादिसूत्रत्रयस्यैकप्रकरणत्वानुपपत्तेः । एकैकसूत्रं तु न प्रकरणम्। प्रकरणबहिर्भावे चैतच्छास्त्रबहिर्भावापत्तिरिति। कथात्रयस्य फलैक्याभावाच्च न विशिष्यसामान्योद्देशः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ किं कथात्वम् । न तावन्नानावक्तृकसाधनदूषणविषयवाक्यत्वं, मिलित्वा नानापुरुषप्रणीतावितिव्याप्तेः । प्रत्येकं कुत्रापि वाक्यैर्नानापुरुषप्रणीतत्वाभावादसम्भवाच्च । नहि समुदायिनां वर्णानां पदानां च नानावक्तृकत्वाभावे तत्समुदाये तत्संभवः । किंच प्रथमवादिना साधनाभिधाने द्वितीयकक्षायामेव यत्र द्वितीयवादिनोऽप्रतिभया स्तम्भेन दूषणानभिधानं तत्राव्याप्तिरिति चेन्न । वादिप्रतिवाद्यन्याभिधानवृत्तिवादिस्थापनासाधनाभिधानप्रतिवादिदूषणाभिधाननिष्पादनोद्देश्यप्रवृत्तवादिप्रतिवाद्यन्यतरसाधनदूषणान्यतराभिधानत्वस्य तत्त्वात् । एतच्च प्रतिवादिस्तम्भस्थलेऽप्यस्ति वादिना स्थापनायाः कृतत्वात् । उभयोरपि स्तम्भे तु कथानारम्भ एवेति दिक् ।

प्रयोजनैक्यान्मिथः साकाङ्क्षत्वाच्च कथैक्यम् । अत एव नानास्थापनाप्रतिस्थापनाभिन्नैका कथा । कथाफलानि चानुत्पन्ननिर्णयोत्पादनम्, उत्पन्नस्य पालनं, पालितस्याभ्यासः, परप्रतिपादनं चेति चत्वारि । जल्पादौ जयादिनाऽलाभाद्यपि । कथा च वादादिभेदात्त्रिधा । तत्र स्वानाततत्त्वनिर्णयाय यत्र तत्त्वबुभुत्सोरेवान्यतरस्य स्थापनानिवृत्तिस्तत्र विजिगीषोर्जल्पवितण्डावत्त्वादवितण्डारूपकथान्तरसंभवान्न्यूनोऽयं विभागः । कथायाश्चातुर्विध्यात् । 'स प्रतिपक्षस्थापनाहीनो वितण्डा' (न्या० सू० १।२।३) इति सूत्रे च स इत्यनेन जल्पवत्त्वादस्यापि परामर्श इत्याह । परे तु उक्तचातुर्विध्यवज्जयतत्त्वनिर्णययोर्द्वयोरप्युद्देश्यत्वे कथान्तरमिति पञ्चविधा कथेत्याहुः । अन्ये त्वधिको-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

sयं विभागः वादिप्रतिवादिसाधनदूषणाभिधानत्वेन कथाया एकविधत्वादित्याहुः।

तदेतन्मतत्रयमप्ययुक्तं स्थापनासाधनमात्रदोषेण तत्त्वनिर्णयानुत्पत्तेः प्रतिस्थापनाया आवश्यकत्वात्। न च यत्र वादी सत्साधनमेव प्रयुङ्क्ते तत्र तत एव तत्त्वनिर्णयः। प्रतिपक्षसाधनमनिवर्त्य प्रथमसाधनेन निर्णयस्य कर्तुमशक्यत्वात्। न च सत्प्रतिपक्षोद्भावने स्यादेवं, तदनुद्भावने तु विनापि तन्निवर्त्तनमस्तु तत्त्वनिर्णय इति वाच्यम्। तत्रापि स्वसाधनस्य सत्प्रतिपक्षितत्वशङ्कया निश्चन्न(?=निश्चयेन) तत्त्वनिर्णयायोगात्। विजिगीषुवितण्डायां तु तत्त्वनिर्णयस्यानुद्देश्यत्वात् परसाधनदूषणमात्रेणैव जयात् कृतार्थता। जयतत्त्वनिर्णययोर्द्वयोरप्युद्देश्यत्वे कथान्तरमिति तु न युक्तं मुक्तिसंसारयोरिव द्वयोः सामग्रीविरोधात्। जयार्थं ह्यप्रतिभादेरप्युद्भावनं छलादिप्रयोगश्च, न तु तत्त्वनिर्णयार्थम्। अत एवैकैव कथेत्यपास्तं सामग्रीभेदात् फलवैलक्षण्याच्च।

किञ्च तत्त्वनिर्णयविजयान्यतराभिलाषिणः सर्वजनसिद्धानुभवानपलापिनः श्रवणादिपटवोऽकलहकारिणः कथौपयिकव्यापारसमर्था अवहिताश्च कथामात्राधिकारिणः। प्रकृतोक्तिका अविप्रलम्भका यथाकालस्फूर्त्तिका अनाक्षेपका युक्तिसिद्धप्रत्येतारस्तत्त्वबुभुत्सवश्च वादेऽधिकारिणः। तद्विपरीता जल्पे। इत्यधिकारिभेद[1] इति दिक्।

---

१ Cp. Viśvanātha Nyāya-pañcānana: *Nyāyasūtra*-vṛtti. 1. 2, 1.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूत्रे वाद इति लक्ष्यनिर्देशः । लक्षणमाह । प्रमाणेति । प्रमाणतर्काभ्यामेव प्रमाणत्वेन सत्तर्कत्वेन च ज्ञाताभ्यामेव साधनोपालम्भौ यत्र सः । वादेऽप्रमाणत्वादिना ज्ञातस्य नोद्भावनं तत्त्वनिर्णयस्यैवोद्देश्यत्वात् । जयमात्रोद्देश्यके जल्पे तु तथेति तद्व्युदासः । न च यत्र जल्पे न तथा तत्रातिव्याप्तिः, अप्रमाणत्वादिना ज्ञातोद्भावनस्वरूपयोग्यान्यत्वस्य विवक्षितत्वात् । लक्षणान्तरमाह । सिद्धान्तेति । सिद्धान्ते(?=न्ता-)विरुद्ध इत्यनेनापसिद्धान्तहेत्वाभासोभयनिग्रहस्थानकत्वं लब्धं, तयोः सिद्धान्तविरुद्धे सत्त्वात् । न्यूनाधिकत्वयोर्लाभायाह । पञ्चेति । उक्तोभयलाभाय, नत्वेतल्लक्षणघटकम् । विनापि न्यायं वादनिष्पत्तेर्भाष्यादावुक्तत्वात् । तथाचाष्टमात्रनिग्रहस्थानकत्वमष्टान्यनिग्रहस्थानोद्भावनयोग्यान्यत्वपर्य्य(? + व-)सितं लब्धम् ।

अत्र हि वादे चतुर्द्धा निग्रहस्थानगतिः । किंचिदसंभावनीयमेव । यथा प्रतिज्ञाहानिः प्रतिज्ञसंन्यासो निरर्थकमर्थान्तरमविज्ञातार्थकमपार्थकमिति षट्कम् । एषामशक्तिसंगूहनप्रकारत्वात्तत्त्वबुभुत्सुतया च वादे तदभावात् । यद्यपि पूर्वप्रतिज्ञादोषदर्शने स्वयंबुद्धिपूर्वकतत्त्यागे प्रतिज्ञाहानिर्वीतरागकथात्वेन संभवति । एवं भ्रमात् संन्यासः, वाचकत्वभ्रमान्निरर्थकम्, उपयोगभ्रमादर्थान्तरं, स्फुटार्थत्वभ्रमादविज्ञातार्थकं, पूर्वापरान्वयभ्रमादपार्थकं च सम्भवति । तथापि स्वाशक्तिनिगूहनार्थं वाद एषां प्रयोयसंभवो बोध्यः ।

किंचित् संभवदप्यनुद्भाव्यम् । यथा प्रतिज्ञान्तरं हेत्वन्तर-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणमिति सप्तकम् । ननु साधनविशेषाधीनसाध्यविशेषसिद्धये प्रतिज्ञान्तरहेत्वन्तरे अवश्योद्भाव्ये इति चेत् । सत्यम् । यत्र साध्यसाधनविशेषो नाभिप्रेतस्तत्परमेतदिति । अथ मतानुज्ञा प्रसङ्गाभासरूपोद्भाव्या । अन्यथा तत्प्रातिहतस्यासाधकताभ्रमः स्यात् । पर्यनुयोज्योपेक्षणमपि स्वयमुद्भाव्यम् । तत्त्वबुभुत्सुकथायां स्वकौपीनोद्भावनस्याप्युचितत्वात् । अन्यथा तत्त्वधीव्याघातादिति चेन्न । मतानुज्ञायाः प्रसङ्गाभासानात्मकत्वस्य वक्तव्यत्वात् । पर्य्यनुयोज्योपेक्षणस्य मध्यस्थोद्भाव्यत्वेन स्वसामयिकत्वात् ।

किंचिदुद्भावनीयम् । न तु तदुद्भावनेन कथाविच्छेदः । यथा विरोधोऽप्राप्तकालं न्यूनमधिकं पुनरुक्तमयथानुभाषणमपसिद्धान्त इति सप्तकम् । एषामकथावसानिकानामपि कथंचित्तत्त्वधीसामग्रीविरोधिफलकत्वात् । तथाहि माता वन्ध्येत्यादौ विरोधस्यायोग्यतारूपतया न्यूनस्याकाङ्क्षितानभिधानरूपतया तत्त्वधीव्याघातकत्वेऽधिकपुनरुक्ताप्राप्तकालानामनाकाङ्क्षिताभिधानरूपत्वात्तदभिधानप्रयोजनानुसरणव्यग्रः प्रतिपत्ता न तत्त्वं बोद्धुमर्हतीत्युद्भाव्यता । अयथानुभाषणे चार्थाप्रतिसंधानमेवेत्युद्भाव्यत्वम् । अपसिद्धान्ते च स्वीकृतस्याप्रमाणविरोध इति तत्त्वव्याघातकत्वादुद्भाव्यता । ननु यत्र हेत्ववयवेन न्यूनता तत्र तत्त्वनिर्णयाभावात् कथावसानमिति कथमुद्भावनमात्रमिति चेत् । सत्यम् । हेत्ववयवहीनतायां कथापर्यवसानमेव, अन्यावयवहीनत्वे तदुद्भावनमात्रमिति । नन्वधिकहेत्वाद्यभिधानस्य शाब्दधीविरो-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धित्वे कथावसानमेव । अन्यथा तु कथमुद्भावनमात्रमपीति चेन्न । हेतुत्रये व्याप्तिपक्षधर्म्मतातात्पर्यचिन्ताव्यग्रस्य प्रतिपत्तुरेकत्रापि तदनिर्णये तत्त्वानिर्णयाभावादधिकमुद्भाव्यान्यतरहेत्वादेः खण्डनं कृत्वा कथा प्रवर्त्तनीयेति तदुद्भावनस्यावश्यकत्वात् ।

हेत्वाभासनिरनुयोज्यानुयोगयोस्तु कथावसानिकत्वं नियतम्, उद्भावितव्यभिचारादिमता हेतुना तत्त्वानिश्चयात् । हेत्वन्तरोपादाने तु कथान्तरं पूर्वकथाविच्छेदः । एवमदुष्टे हेतौ दोषोद्भावनं निरनुयोज्यानुयोगः । तस्यानुद्भावने निर्णायकोऽपि हेतुर्दुष्टत्वभ्रमात् त्यक्तः स्यादिति कुतस्तत्त्वनिर्णयः स्यादिति तदुद्भावनं ध्रुवम् ।

न च तत्रोद्भावितव्यभिचारादेव निर्वाहे निरनुयोज्यानुयोगोद्भावनेऽपि दोषान्तरदानेन सैव कथानुवर्त्तत इति वाच्यम् । स्थापनोक्तप्रथमसाधनप्रतिवाद्युक्तप्रथमदूषणयोरेव विचारे कथैक्यात् । तयोरेकतरानिर्वाहे तत्कथाविच्छेदात् । साधनान्तरदूषणान्तरयोरुपादाने हि कथान्तरम् ।

अथ हेत्वाभासातिरिक्तनिग्रहस्थानानामस्थान उद्भावनेन यत्र निरनुयोज्यानुयोगस्तत्र तस्य न कथावसानिकत्वम्, अस्थाने निग्रहस्थानान्तरोद्भावनेऽपि प्रकृतसाधनस्यानुद्भवादिति चेत् । सत्यम् । हेत्वाभासानामेवास्थाने यत्रोद्भावनं तत्रैव निरनुयोज्यानुयोगस्य कथावसानिकत्वात् । अन्यत्रोद्भावनस्याप्यनावश्यकत्वात् । अथ हेत्वाभासनिरनुयोज्यानुयोगयोरुद्भावनोत्तरं यत्र तयोर्न निर्णयस्तत्र कथानुवृत्तिः संभवतीति चेत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

किं तावता। यस्य हेत्वाभासस्योद्भावनोत्तरमेव प्रतीतिस्तस्यैव कथावसानिकत्वात्। यथा धूमवान्वह्नेरित्यादौ साधारण्यादेः। एवं यस्य निरनुयोज्यानुयोगस्योद्भावनोत्तरमेवानुयोगाभावः प्रतीयते तस्य तत्त्वम्। यथा वह्निमान् धूमादित्यादावुद्भावितस्य व्यभिचारादेरभाव इति। अथ यत्र हेत्वाभासान्तरेण दुष्टं साधनं प्रतिवादिना दोषान्तरेण दूष्यते, वादिना च निरनुयोज्यानुयोग उद्भाव्यते तत्र भवति कथावसानं, न तु तत्त्वनिर्णयो हेतोर्दुष्टत्वादिति चेत्। किं ततः। कथावसाने फलसंपत्त्यनियमात्।

अथैवमष्टनिग्रहस्थानो वाद इति कथमिति चेत्। हेत्वाभासपञ्चकहेत्ववयवन्यूनानिरनुयोज्यानुयोगापसिद्धान्ताभिप्रायेणेत्येके। सामयिकोऽयं नियम इत्यन्ये। कथावसानिकनिग्रहस्थानमात्रोपलक्षणमित्यपरे। वादस्य लक्षणं तु तत्त्वनिर्णिनीषुकथात्वम्। तत्त्वनिर्णयमात्रोद्देशप्रवृत्तकथात्वं तु न लक्षणम्, उभयोद्देश्यत्वाभावे मात्रपदव्यवच्छेद्याभावात्। भ्रान्तस्य तथोद्देशेऽपि तदनुरोधेन कथानिर्वचनस्यायुक्तत्वात्।

इदमत्र बोध्यम्। प्रतिवाद्यस्फुरितं वादिसाधनदूषणं वादिना स्वयमुद्भाव्यम्। एवं वाद्यस्फुरितः प्रतिवादिदूषणोद्धारः प्रतिवादिना स्वयं वाच्यः। अन्यथा तत्त्वनिर्णयासंभवात्। अत एव वादे स्थेयानुविधेययोर्नावश्यकत्वम्। स्थेयो हि मध्यस्थो वीतरागः। तस्य च कथाविशेषविषयव्यवस्थाकथकोक्तसंकलनकथकगुणदोषावेरे(?=वे-)चनभग्नवादिप्रतिवादिप्रबोधनिःयत्र(?) कथाफलख्यापनानि व्यापाराः। ते च तत्त्वबुभुत्सुभ्यां वादि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भ्यामेव संपाद्या इति किं स्थेयेन । राजादिरूपोऽनुविधेयोऽपि लाभपूजाख्यातिसम्पत्तयेऽपेक्षितः । तत्त्वबुभुत्सावतोर्वादिनोस्तु न तत्सम्पतिरपेक्षिता । दैवागतानां तु न परिवर्जनं सम्वादेन कथाभासशङ्काव्युदासाय । तदुक्तं मिश्रैः—न वादे प्राश्निकानामुपादानं, दैवागतानां तु न वर्जनमिति । प्राश्निका मध्यस्थाः ।

तदेवं वादप्रवृत्तिक्रमः—

प्रतिपन्नतत्त्वेन गुरुणा सह बुभुत्सोश्च शिष्यस्य, बुभुत्सावतोः शिष्ययोरेव वा, प्रतिपन्नतत्त्वयोरेव वा अनुविधेयबुभुत्सावशाद्विनापि न्यायमेकेन शब्दोऽनित्य इत्यभिहिते शब्दो नित्य इत्यपरो ब्रूयात् । इयमेव विप्रतिपत्तिः । यद्वा शब्दो नित्यो न वेत्यादिविप्रतिपत्त्युत्तरं शब्दोऽनित्यः, कृतकत्वात्, यत् कृतकं तदनित्यं यथा घटः, अनित्यत्वव्याप्यकृतकत्ववानयं, तस्मादनित्य इति प्रयुज्य संक्षेपतो विस्तरतो वा हेतुकण्टकानुद्धृत्य दृष्टान्तकण्टकानपि साध्यसाधनविकलत्वादीनुद्धृत्य विरते वादिनि प्रतिवादी दूष्यांशमात्रमनूद्य दूषणं प्रयुञ्जीत । यथा कृतकत्वादिति त्वया हेतूकृतं तदसाधकमसिद्धत्वात् । अत्र पञ्चावयवप्रयोगो न कार्यो व्याप्त्यादेरुभयसिद्धत्वात् । व्याप्तेरेवोभयसिद्धत्वादुदाहरणमेव वा न प्रयोक्तव्यम् । विप्रतिपन्नं प्रति कार्य्य एवेत्येके । संप्रदायविरोधान्न कार्य एवेति तु बहवः ।

ततः स्थापनादूषणानन्तरं प्रतिवादी शब्दो नित्यः, आकाशमात्रवृत्तिधर्म्मत्वात्, यो य आकाशमात्रधर्म्मः स नित्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

एव यथा तदेकत्वमिति स्वपक्षे स्थापनां कुर्य्यात्। मीमांसक-स्यान्वयव्यतिरेकसहचारयोर्द्वयोरपि प्रदर्शनीयत्वादुदाहरणे प्रवक्तारः (?) यो य आकाशधर्म्मः स नित्यो यथा तदेकत्वं, यो न नित्यः स नाकाशधर्म्मः यथा घट इति वा तन्मत उदाहरणम्।

एवं प्रयुज्य प्रतिवादिनि विरते वादी स्वपक्षदोषमुद्धरेत्। तथाहि शब्दे कृतकत्वं नासिद्धम्, उत्पन्नो गकार इत्यनुभवात्। यच्च त्वया हेतुकृतमाकाशमात्रधर्म्मत्वादिति तदसाधकं सोपाधित्वादिति।

एवं स्वपक्षदोषोद्धारपरपक्षदोषोद्भावनानन्तरं विरते वादिनि पुनः प्रतिवादी चतुर्थकक्षायां स्वपक्षदोषमुद्धृत्य परपक्षदूषणं दृढीकुर्यात्। परपक्षदूषणं दृढीकृत्य वा स्वपक्षदोषमुद्धरेत्। यथास्फुरणमेवात्र नियामकं द्वयोरप्यवश्यकार्यत्वात्। न तु जल्पवदादौ दोषोद्धारः पश्चाद् दूषणदानमिति नियम इति बोध्यम्। तथा चैवं चतुर्थी कक्षा। आकाशमात्रधर्म्मत्वादित्यत्र यत्सोपाधित्वं त्वयोक्तं तद्योग्यानुपलब्ध्यायोग्यस्योपाधित्वम्। अयोग्योपाधिशङ्का स (?=च) त्वदुक्तेऽपीति।

ततः स्थापनावादी। अजन्यत्वस्योपाधेर्विद्यमानत्वान्नोपाधिनिरासः। उत्पन्नो गकार इत्यस्य चाभिव्यक्तिविषयत्वे मानाभावः। उत्पन्नो घट इत्यादेरपि तथात्वापत्तेः।

पुनः प्रतिवादी वदति। अजन्यत्वं पूर्वसाधनव्यतिरेकतया नोपाधिरिति। तस्याप्युपाधित्वं तत्त्वग्राहकमानशब्दा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(?+भा)वादिति वादी वदति । इत्यादिकं यावत्स्फुरणं कक्षावृद्धिरिति दिक् ॥

वादानन्तरमुभयपक्षस्थापनावत्त्वेन वादसाम्याद्वितण्डातः प्राग्जल्पं लक्षयति—

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ न्या० सू० १ । २ । २ ॥

छलादिभिः साधनोपालम्भौ यत्र स जल्पः । छलादिभिरुत्तरप्रवर्त्तनं सदुत्तरास्फूर्तौ ऋ(?=श्रु-) तिभङ्गभिया शाखान्तरसंचाराय, वाह्यैरधिक्षिप्ते तद्वर्त्मनि प्राक्सदुत्तरास्फूर्तौ तत्त्वाध्यवसायरक्षणाय च ।

इत्थमेव वादे व्यवच्छिन्नेऽपि न केवलं छलादिभिरेवात्र प्रवर्त्तनं किंतु प्रमाणतर्काभ्यामपीत्याह । यथोक्तोपपन्न इति । यथोक्तेन उपपन्नेन योग्येन उपपन्नोऽन्वितः । मृगाक्षीतिवन्मध्यपदलोपी समासः । तथा च वादलक्षणोक्तानां मध्ये उपपन्नेन योग्येन प्रमाणतर्कसाधनोपालम्भेन । पक्षप्रतिपक्षपरिग्रह इत्यनेन चान्वयो लभ्यते । यत्तु सिद्धान्ताविरुद्ध(?=:)पञ्चावयवोपपन्न इत्यपि लभ्यत इति भाष्यव्याख्यानं तदसत् । सिद्धान्तेत्यादितस्य (?=लभ्य-)स्यापसिद्धान्तन्यूनत्वादेर्निग्रहस्थानपदेनैव लाभात् । पञ्चावयवा न प्रयोक्तव्या इति समयबन्धाधीनजल्पाव्याप्तेश्चेति गुरवः । तथा च वादे प्रमाणतर्काभ्यामेव साधनोपालम्भौ, जल्पे तु छलादिभिरपीति विशेषः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

वितण्डाव्युदासाय पक्षेति। उभयपक्षस्थापनावत्त्वं तदर्थः। न च मया शब्दानित्यत्वं साध्यं त्वया मत्पक्षो दूष्यः, त्वया वान्विताभिधानं साध्यं मया त्वत्पक्षो दूष्य इति समयबन्धेन प्रवर्त्तितायां परस्परविरुद्धाविषयकत्वेन जल्पभिन्नायामतिव्याप्तिः। परस्परविरुद्धविषयविषयकस्थापनावत्त्वस्य विवक्षितत्वात्। इयं तु वितण्डाद्वयरूपैव विजिगीषुकथात्वात्। एकवाक्यत्वाभावेनैककथात्वाभावात्। न चैवं जल्पोऽपि वितण्डाद्वयमेवास्तु, किं पार्थक्येनेति वाच्यम्। वितण्डायां परपक्षनिषेधस्यैवोद्देश्यत्वात्। जल्पे तु स्वपक्षसाधनस्यापीति विशेषात्।

एतेन छलादीनां समुदायोऽसंभवी, एकैकं चाननुगतम्, अन्यतरत्वेनानुगमे वादेऽतिव्याप्तिः, अपसिद्धान्तादीतरपरत्वे यत्र जल्पेऽपसिद्धान्तादेरेवोद्भावनं तत्राव्याप्तिः, वितण्डायां चातिव्याप्तिरित्यादि यथाश्रुते दूषणं परास्तम्। एतेन जल्प उभयसाधनप्रयोगो नास्ति अवसरावाभावाभावात् (?=अवसराभावात्)। तथाहि। यदि वादिप्रयुक्तं साधनं प्रतिवादिना दूषितं तदा निगृहीतो वादी, जितं प्रतिवादिना, निवृत्ता कथा। न दूषितं चेदुत्तराभासोक्त्या प्रतिवादी निगृहीतो, जितं वादिना, निवृत्ता कथेति नास्ति द्वितीयसाधनावसर इत्यपास्तम्। वादे प (?=स्व-) साधनस्थिता (?=तौ) परसाधननिवृत्तौ ये (?) च तत्त्वनिर्णयवज्जल्पेऽपि परसाधननिवृत्तौ स्वसाधनस्थितावेव जयात् स्वसाधनपरसाधनदूषणे वाच्ये इति समयबन्धेनैव जल्पप्रवृत्तेः। परपक्षदूषणमात्रे च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वितण्डात्वमेवेति वितण्डातो जल्प उत्कर्षातिशय इति । तथा चोभयपक्षस्थापनावती विजिगीषुकथा जल्प इति लब्धम् ।

जल्पे च वादिप्रतिवादिनौ सम्भावितविद्यौ, न तु विदितन्यूनाधिकभावौ । विशेषविज्ञानफलयोः कथाया वैफल्यात् । सभ्या वादिप्रतिवादिसम्मता रागद्वेषरहिताः परोक्तग्रहणधारणप्रतिपादनसमर्था अनेके स्वीकार्य्याः । बहुसम्वादेन निर्णयोत्पत्तेः । सभापतिरपि सर्वसम्मतो रागादिशून्यो निग्रहानुग्रहसमर्थः कर्त्तव्यः । दृष्टान्तप्रयोगे कण्टकोद्धारे साधकतानुमानप्रयोगे वीप्सायां सर्वनाम्नानुभाषणे उपनयनिगमनयोस्तथेति निर्देशे सिद्धसाधनोपाध्यप्रयोजकानां स्वशब्देन द्वारीभूतहेत्वाभासपदेन वोद्भावनेऽनेकनिग्रहस्थानसङ्करे किञ्चिदभिधाने सकलाभिधाने वान्यत्रापि यत्र यत्र विवादस्तत्र विशिष्य समयबन्धः कार्य्यः । अन्यथा कथापर्यवसानं न स्यात् । स्याच्च मध्यस्थानां मतभेदाश्रयणेनान्योन्यकलह इति ।

जल्पप्रवृत्तिस्त्वेवम् । मध्यस्थेन विप्रतिपत्तौ कृतायां स्वमतं परिगृह्य स्वसिद्धान्तसमयानुसारेण पञ्चन्यवयवादि वाक्यं प्रयुज्य संक्षेपाद् विस्तरतो वा दोषानुद्धरेत् । नायं हेत्वाभासस्तल्लक्षणशून्यत्वादिति संक्षेपः । नायं साधारणोऽसाधारणो वेत्यादि विस्तरः ।

एवं कण्टकोद्धारान्तं प्रयुज्य विरते वादिनि प्रतिवादी प्रथमं तद् दूषयेत् । प्रतिपक्षदूषणं विना सति परिपन्थिनि स्वपक्षस्थापनावसराभावात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

दूषणक्रमश्चैवम् । अनुक्तग्राह्याण्यज्ञानाप्रतिभाविक्षेपानुभाषणानि । अननुभाषणं द्वितीयकक्षादा (?+व-) नुक्तग्राह्यं बोध्यम् । एषामनवकाश उच्यमानग्राह्याण्यप्राप्तकालार्थान्तरापार्थकनिरर्थकान्युद्भाव्यानि । अनुद्भावने पर्युनुयोज्योपेक्षणे प्रतिवादी निगृहीतः स्यात् ।

यद्यपि न्यूनाधिकपुनरुक्तापसिद्धान्ता अप्युच्यमानग्राह्या एव, तथापि पूरणादिना तत्प्रतीकारसंशयान्न तदोद्भावनम् । किन्तु वादिनः प्रयोगोपसंहारोऽपेक्षणीयः । अन्यथा तत्प्रतीकारे प्रतिवाद्येव निरनुयोज्यानुयोगेन निगृहीतः स्यादित्युक्तग्राह्येष्वेव तत्पातः । न्यूने पूरणमधिके विकल्पः पुनरुक्ते प्रयोजनवत्त्वप्रतिपादनमपसिद्धान्ते शेषेनन्यादि(?)प्रयोजनं प्रतीकार इति । एषां चतुर्णामप्यलाभ उक्तग्राह्याण्युद्भाव्यानि ।

तत्र हेत्वाभासाभिन्नानां प्रतिज्ञाहानिप्रतिज्ञान्तरप्रतिज्ञाविरोधप्रतिज्ञासंन्यासहेत्वन्तराविज्ञातार्थाज्ञानाप्रतिभानानुज्ञापर्यनुयोज्योपेक्षणनिरनुयोज्यानुयोगाननुभाषणानामुक्तग्राह्याणां प्रथमकक्षायामसंभव एव । अविज्ञातार्थस्य संभवेऽपि परिषत्प्रतिवाद्यभिधानापेक्षया न तत्कालमुद्भाव्यता । विक्षेपस्तूद्भावनयोग्यः । किन्त्वेषोऽनु (?+क्त-) ग्राह्यमध्ये शंकरमिश्रैरुक्तः । प्रतीकारशङ्कानुद्भावितन्यूनादिचतुष्कमप्युद्भावनयोग्यम् ।

एषां त्रिविधानामन्यतमलाभे तावतैव कथाविच्छेदः । न तु स्वपक्षसाधनावसरः । न वा हेत्वाभासेऽपि तदुद्भावनं, शरसंधानसमय एव यो मूर्छितस्तत्प्रहारवन्निष्फलत्वात् । एषा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मलाभे पुनरज्ञाननुभाषण (?=णा-) पत्तिभयेन तदुक्तं दूष्यांशमात्रमनूद्य प्रतिवादी हेत्वाभासेन स्थापनां दूषयित्वा स्वपक्षे साधनं कुर्यात् । कण्टकोद्धारं च कुर्यात् ।

ननु हेत्वाभासानामुक्तग्राह्यत्वेन प्रतिज्ञाहान्यादितोऽविशेषे कथमादौ तेषां नोद्भावनमिति चेत् । हेत्वाभासानामर्थदोषत्वे प्रणिधानगम्यत्वादसाधकतानुमानसापेक्षत्वात् । प्रतिज्ञाहान्यादीनां वस्तुदोषत्वाभावेनासाधारणवक्तृदोषतयात्यन्तापकर्षोन्नायकत्वाच्च ।

अथ स्थापनावादी तृतीयकक्षास्थितोऽनुक्तग्राह्याणामथोच्यमानग्राह्याणां लाभे तदैवोद्भावनम् । अन्यथा पर्यनुयोज्योपेक्षणेन निगृहीतः स्यात् । तदलाभे तूक्तग्राह्यप्रतिज्ञाविरोधन्यूनाधिकपुनरुक्तापसिद्धान्तनिरनुयोज्यानुयोगमध्यस्थोद्भाव्यपर्यनुयोज्योपेक्षणमतानुज्ञानामुद्भावनम् । प्रतिज्ञाहानिप्रतिज्ञान्तरप्रतिज्ञासंन्यासहेत्वन्तराणां तु द्वितीयकक्षायामप्यसम्भव एव । तेषामप्यलाभे तु परदत्तं स्वपक्षे दोषमुद्धृत्य परसाधने दूष्यांशमनूद्य हेत्वाभासानुद्भावयेत् ।

ननु परपक्षदूषणमात्रेण जये स्वपक्षसाधनाभिधानं वृथेति चेत् । न । जल्पे हि स्वपक्षसाधनपरपक्षदूषणशक्तिद्वयनिरूपणं कथकयोः । अत एवायं वितण्डातो भिद्यते । तथा च दूषितपरपक्षोऽपि न विजयी । श्लाघ्यस्तु स्यादात्मानमरक्षन् परघातीव वीरः । अथ स्थापनावादिना प्रथमं स्वपक्षदोषोद्धारस्तदुत्तरं परपक्षदूषणं क्रियत इत्यत्र किं बीजम् । स्वदोषानुद्धारेऽत्यन्ता-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पकर्षेण प्रथमं स्वदोषोद्धारस्य सांप्रदायिकत्वमित्यवेहि। तर्हि मास्तु परपक्षदूषणमिति चेत्। न। परपक्षादूषणे रक्षितस्वपक्षोऽपि हि नहि विजयी। श्लाघ्यस्तु स्याद्वश्चितपरप्रहार इव तमप्रहरमाणः।

ननूक्तोच्यमानग्राह्यनिग्रहस्थानलाभे कथं स्वपक्षदूषणोद्धारपरपक्षदूषणे न कार्ये इति चेत्। शरसंधानमात्रेण यो मूर्छितस्तद्वाणवारणप्रहरणवद् वैफल्यात्। एवमग्रिमाग्रिमकक्षासु निग्रहस्थानलाभेऽपि न तदुभयं कार्यम्। किंत्विदमत्र निग्रहस्थानमित्युक्त्वैव विरमेत्।

जल्पे कक्षावृद्धिक्रमश्चेत्थम्—

वायुः प्रत्यक्षो न वेति विप्रतिपत्तौ समयबन्धे च कृते मीमांसकस्थापना। वायुः प्रत्यक्षः, प्रत्यक्षस्पर्शाश्रयत्वात्, यो यः प्रत्यक्षस्पर्शाश्रयः स प्रत्यक्ष एव यथा घटः। नायं हेतुराभासस्तल्लक्षणायोगादिति।

अत्र नैयायिकस्य द्वितीयकक्षा। प्रत्यक्षस्य स्पर्शाश्रयत्वं यद्धेतूकृतं तत्प्रत्यक्षत्वासाधकं प्रत्यक्षत्वव्यभिचारित्वात्। वायुर्न प्रत्यक्षः, नीरूपबहिर्द्रव्यत्वात्, यद्यन्नीरूपबहिर्द्रव्यत्ववत् तदप्रत्यक्षं यथाकाशम्। अप्रत्यक्षत्वव्याप्यनीरूपबहिर्द्रव्यत्ववानयं, तस्मादप्रत्यक्षः। नायं हेतुराभासः तल्लक्षणायोगात्।

अथ मीमांसकस्य तृतीयकक्षा। मम हेतोरसाधकत्वसाधकं यत् प्रत्यक्षत्वव्यभिचारित्व (?+मि-) त्युक्तं तदसाधकत्वासासाधकं स्वरूपासिद्धत्वात्। यच्च नीरूपद्रव्यत्वं त्वदीयो हेतु-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तद् वायुप्रत्यक्षत्वाभावासाधकं निःस्पर्शत्वेनोपाधिना सोपाधिकत्वात् ।

ततो नैयायिकस्य चतुर्थी कक्षा । प्रत्यक्षस्पर्शाश्रयत्वे त्वदीयहेतौ प्रत्यक्षत्वव्यभिचारित्वं न स्वरूपासिद्धम् । तथाहि । प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि, बहिर्द्रव्यत्वाव्यभिचारित्वे सति बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकोद्भूतरूपवत्त्वव्यभिचारित्वात् । यद्यद्बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकोद्भूतरूपवत्त्वव्यभिचारि तत् प्रत्यक्षत्वव्यभिचारि । यथा स्पर्शवत्त्वम् । यश्च नीरूपबहिर्द्रव्यत्वे मदीयहेतौ निःस्पर्शत्वमुपाधिरुद्भावितश्च स परमाणौ साध्याव्यापक इत्यनुपाधिः । शाखानुमानानामसाधकत्वानुमानप्रपञ्चतया न पञ्चावयवत्त्वनियमः । किन्तु व्याप्तिपक्षधर्मतामात्रमुपदर्शनीयमिति न न्यूनतेत्यादि । यथासामर्थ्यं कक्षाद्वयद्धिर्बोध्या ॥

जल्पोपजीवकत्वात्तदनन्तरं वितण्डां लक्षयति—

स प्रतिपक्षस्थापनाहीनो वितण्डा ॥
न्या० सू० १ । २ । ३ ॥

वितण्डेति लक्ष्यनिर्देशः । वितण्ड्यते आहन्यते परपक्षोऽनयेति योगार्थः । तडि आहनन इति धात्वनुसारात् । स जल्पः प्रतिपक्षस्थापनाहीनो द्वितीयपक्षस्थापनाहीनः । न च जल्पो वितण्डेति व्याहतं, स इत्यनेन योग्यतावलाज्जल्पान्तर्गतविजिगीषु-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कथामात्रपरामर्शात्। तथा च प्रतिपक्षस्थापनाहीनविजिगीषुकथेति लक्षणं लब्धम्।

ननु यत्र जल्पेऽप्रतिभादिना वादिन उक्तग्राह्यनिग्रहादिप्राप्त्या च न प्रतिस्थापनोपन्यासस्तत्राव्याप्तिः, परमतनिराकरणार्थं यत्र सत्प्रतिपक्षः कृतस्तत्राव्याप्तिश्चेति चेत्। न। वादिस्थापितार्थविरुद्धार्थसाधकत्वेनोद्देश्यत्वविरहविशिष्टकथाया वितण्डात्वात्। अप्रतिभादिना जल्पे तदनुपन्यासेऽप्युद्देश्यत्वसत्त्वान्नातिव्याप्तिः। सत्प्रतिपक्षोपन्यासश्च न साधनाय, किन्तु परपक्षखण्डनायेति न प्रतिस्थापनात्वम्। शब्दोऽनित्यः कृतकत्वादित्यादिस्थापनायां कृतकत्वमसाधकम्। नित्यत्वव्याप्यव्योमैकगुणत्वलक्षणप्रतिहेतुप्रतिहतत्वादित्येवं सत्प्रतिपक्षोद्भावनं कार्यम्। अन्यथा सत्प्रतिपक्षमुद्भाव्य पुनरसाधकत्वसाधनेन प्रयासगौरवम्। न चेदं प्रतिस्थापना कोटिविरुद्धकोटिसाधनस्यैव तत्त्वादित्यपि वदन्ति॥

सा च वितण्डा क्वचित् त्वया शब्दानित्यत्वं साधनीयं मया दूषणीयमेवेति प्रतिज्ञया, क्वचिच्च त्वया शब्दानित्यत्वं साधनीयं मया त्वत्पक्षो दूषणीयो, मयान्विताभिधानं साधनीयं त्वया मत्पक्षो दूषणीय इत्यादिप्रतिज्ञया। अथेयं नैका कथा परस्पराकाङ्क्षाविरहादिति चेत्। सत्यम्। वितण्डाद्वयस्वीकारात्। यत्तु यदि वितण्डा कथान्तरं तदा जल्पकथोच्छिद्येत, परपक्षनिराकरणमात्रेण जयसंभवे स्वपक्षसाधनपरपक्षदूषणोद्देशेन प्रवृत्त्ययोगादिति। तन्न। अधिकशक्तिख्यापनायानुविधेयादीच्छया

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

च तत्संभवात्। जल्पे हि स्वपक्षरक्षायां परपक्षखण्डने च वादिनोः प्रत्येकं शक्तिद्वयम्। कृतविद्यक्षत्रिययुद्धवत्। वितण्डायामेकस्य स्वरक्षामात्रे, परस्य पराघातमात्रे शक्तिः। दशरथदशाननतनयतमस्विनीयुद्धवत्। काकोलूकयुद्धवच्चेति।

वितण्डाप्रवृत्तिश्चेत्थम्—

क्षितिः सकर्तृका न वेति विप्रतिपत्तौ। क्षितिः सकर्तृका, कार्यत्वात्, यद्यत्कार्य्यं तत्सकर्तृकं यथा घटः, सकर्तृकत्वव्याप्यकार्यत्ववतीयं, तस्मात् सकर्तृका। नायं हेतुराभासस्तल्लक्षणायोगादिति प्रयुक्ते मीमांसकस्यान्यस्य वा वैतण्डिकस्य द्वितीया कक्षा। कार्य्यत्वं सकर्तृकत्वासाधकम्, अङ्कुरादौ साध्याभाववति गतत्वात्। अङ्कुरादाविति प्रतिवाद्याकाङ्क्षानिवृत्तये, न तु हेतुप्रविष्टम्। सन्दिग्धानैकान्तिकत्वादिति तु नोद्धाव्यं वादिप्रतिवादिनोर्मिथोविपरीतनिश्चयसत्त्वेन सन्दिग्धत्वविशेषणस्यान्यतरं प्रत्यसिद्धत्वात्। तर्हि सन्दिग्धानैकान्तिकत्वं दोषो न स्यादिति चेत्। न। परार्थानुमाने इष्टत्वात्। स्वार्थानुमान एव तस्य दोषत्वात्। यवाङ्कुरेऽनैकान्तिकोद्भावने यदि वादी तत्र साध्यसन्देहं हेतुसदसत्त्वसन्देहं वा ब्रूते तदा तथापि संदिग्धानैकान्तिकत्वमित्युद्धाव्यम्। न चैवं हेत्वन्तरवद् दूषणान्तरं प्रतिज्ञाहानिवद् दूषणहानिर्वा निग्रहस्थानं सन्दिधानैकान्तिकोद्भावनेऽनैकान्तिकत्वस्यात्यागात्।

अथ वादिनः तृतीयकक्षा। नायं हेतुरङ्कुरादौ सन्दिग्धानैकान्तिकस्तत्रापि साध्यसत्त्वात्। न चात्र कार्य्यत्वेन हेतुना साध्यसाधने क्षितावनैकान्तिकत्वं शङ्क्यम्। क्षित्यङ्कुरादावेकरू-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पावच्छिन्ने प्रत्येकरूपावच्छिन्ने समूहालम्बनाया वानुमितेः स्वीकारात्।

अथ चतुर्थकक्षा वैतण्डिकस्य। एवमनुमितिस्वीकारे सन्दिग्धानैकान्तिकत्वं क्वापि दोषो न स्यात्तत्राप्यनुमानसंभवात्। अथ व्यभिचारज्ञानत्वेनैवाव्यभिचारनिश्चयविरोधित्वात् पक्षीयव्यभिचारसंशयोऽपि विरोधी, यत्रानुकूलतर्कावतारस्तत्र तस्यादोषत्वान्नानुमानमात्रोच्छेद इति चेत्। प्रकृतेऽपि तर्हि तत्संशयो दुर्वार इति।

ततो वादिनः पञ्चमी कक्षा। लाघवात् कार्य्यत्वावच्छिन्नं प्रति कर्तृत्वेन हेतुतयाङ्कुरादावपि कर्तृजन्यत्वनिश्चयान्न संदिग्धानैकान्तिकत्वमिति। एवं हेत्वाभासान्तरेऽपि कक्षाबुद्धिः। क्वचिदपि निग्रहस्थानलाभे कथाविरामः। उद्भाविते निग्रहस्थाने हेत्वाभासे वा विप्रतिपत्तौ मध्यस्थवाक्यान्निर्णय इति कथकव्यवस्था॥

॥ इति कथाप्रकरणम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

APPENDIX.

READINGS IN MANUSCRIPT ख AS COMPARED WITH THOSE IN THE PRESENT TEXT (PP. 1-44)[1].

Page	Line	Variants from ख		Readings in the printed text
1	14	-तमाज्ञानेऽपि	for	-तमे ज्ञातेऽपि
3	17	एव युक्तम्	,,	एवमुक्तम्
4	14	मन्वादि-	,,	भगवदादि-
,,	,,	प्रयत्न-	,,	तद्यत्न-
,,	15	त एवोचुः	,,	तत्त्वबोधः
5	7	नेश्वरशरीराव्याप्तिः		omitted
6	2	-विभाजक-	for	-विभागे
,,	11-12	-सन्निकर्षनिर्विकल्पादि-	for	-सन्नि०—च
,,	13	तत्तदन्यत्वं वा	,,	तत्तदन्यत्वं
7	15	विभागविशेष-	,,	विशेष-
8	17	-भावनात्मक-	,,	-भावात्म-
,,	19	प्रमा	,,	प्रमाणम्(क--प्रमाण-)
9	12	-संबद्धानि	,,	-संबन्धीनि
,,	,,	प्रा-	to be corrected to	घ्रा-

---

1 A few mistakes of the printed text, detected in course of comparison with MS. ख, have also been pointed out here.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

,,	16	इत्यधिकं	for	चेत्यधिकं
10	5	-ऽनेनेति	,,	-ऽनेति
,,	18	-तरजनकज्ञानस्यैव	,,	-तया ज्ञानजनकस्यैव
11	7	चरमः	,,	चरम-
,,	11	-व्याप्तेश्च	,,	-व्याप्तिश्च
11	16-18	पुरुषा०—वा	omitted	
,,	18	चरमः	for	चरम-
,,	19	-संयोगसमान-	,,	-संयोग-
12	8	-संयोगविशेष-	omitted	
,,	13	अवच्छेदेन	for	अवच्छेदेऽपि
,,	14	आद्यः	,,	आद्य-
,,	22	-सुखदुःखयोरपि	,,	-दुःखयोरपि
13	7	द्वैविध्यम्	,,	विध्यम्
,,	,,	फलत्वं	,,	फलं
,,	14	सुखं	,,	सुख-
14	11	-मान-	to be corrected to	-माना-
14	16-17	विरोधसंसर्गक	for	विरोधिसंसर्गिक-
15	5	विरुद्धेत्य-	,,	विरुद्धत्वे(क—विरुद्धे त्व-)
,,	,,	तथा चा-	,,	तथा-
,,	7	-क्षण-	to be corrected to	-क्षणा-
,,	17	-व्याप्या	for	-व्याप्यं
,,	22	सपक्ष	,,	परपक्ष-
,,	23	सपक्षगत-	,,	सपक्ष-
16	9	मणौ	,,	मनो
,,	19	तदभावोपलब्धिस्	,,	तदभावनिश्चयस्
17	10	संशयो ज्ञानत्वादि-	,,	संशयज्ञानविषयत्वादि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

,,	11-12	प्रामाण्यसंशय०—विरोधित्वाद्	omitted
,,	16	तत्०—ज्ञानस्य	,,
18	5	ऽर्थ्यमाणार्थ-(both क and ख)	for ऽर्थ्यमानार्थ-
,,	8	विषयता-	,, विषय.
,,	16	प्रयुज्यमाने	omitted
,,	17	तद्धर्म-	,,
19	5	इति टीका	for टीकायां
,,	7	-त्ववत्ता	,, -तरवत्ता
20	3	तेन	,, तथा च
,,	8-9	तत्तच् (both क and ख)	,, तच्
,,	10	ऽपसि-	,, ऽसि-
,,	17-18	पञ्च०—बोध्यम्	omitted
20-21	19-3	सर्व०—इति	,,
21	7	शास्त्रसिद्धोऽर्थस्	for शास्त्रोऽर्थस्
,,	8-9	भौ०—०दात्	omitted
,,	10	प्रमा०—०दात्	,,
,,	11	मान०—०दि	,,
,,	15-16	दृष्टा०—भेदः	,,
22	4-5	यौगानामभौतिकानीति सांख्यानामिति वार्त्तिके	यौगानां नैयायिकानां for नैया०—सांख्यानाम्
,,	12	निबन्धोक्तोऽर्थः	for निबन्धेऽर्थः
,,	12-13	बललभ्य इतर-	,, बलेनेतर-
,,	13	बाधादि-	,, बाधादिना
,,	19	एव तद्-	,, तद्-
23	2	ज्ञायते	for जायते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

,,	8	उक्त्यैव	,,	उक्त्यै-
,,	9	नोक्तम् (both क and ख)		
,,	18	-निष्ठः	for	-निष्ठ-
,,	19	विचार्य-	,,	विचार-
,,	,,	वाऽऽहार्यः	,,	आहार्य-
,,	20	स्व-	,,	-षु
24	5	-प्रमाण-(both क and ख)	,,	-प्रमाणं
,,	8	शब्दाज्ज्ञातम्	,,	शब्दाज्ञानम्
,,	9	रूप-	,,	स्वरूप-
,,	11	अपि omitted		
,,	15	न	for	नाननुगमो न वा
,,	17	-वत्त्वम् (both क and ख)	,,	-त्वम्
,,	22	वत्त्वेन	,,	त्वेन
25	3	प्रति०—सति	omitted	
,,	4-5	सति पर्वत इत्यादि	,,	
,,	5-6	-प्रतिज्ञादिघटकेऽव्याप्तेः तद्विषयितायाः शिवो द्रव्यमिति	for	-प्रतिज्ञा०—इत्यादि
,,	9-10	एव	for	प्रतिज्ञाविष०—वा
,,	16	चेति बोध्यम्	,,	चेति
,,	16-21	इदं—०वात्	omitted	
,,	22	इति बोध्यम्	,,	
26	3	अव्याप्तेः	for	असंभवात्
,,	4	तत्तन्-	,,	तु
,,	6-7	स्वा०—०घ्टत्वं	omitted	

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

,,	7–8	अस्य—अदोष;	,,	
,,	11	प्रतिज्ञादि-	for	प्रतिज्ञा-
,,	12	-क्ता-	,,	-क्तता-
,,	15	प्रतिज्ञात्वादि-	,,	प्रतिज्ञादि-
,,	17–18	विषयस्	for	विषय०—हाराः ।
,,	21	-पन्न-	,,	-पन्नं
,,	,,	After वाक्यम् is added:—न न्यायः अत्रैव वाक्येऽतिव्याप्तेः किं त्वत्वमिति चरमकारणलिंग-परामर्षप्रयोजकशाब्दज्ञानजनकं वाक्यं(sic)		
,,	22	-पञ्चवाक्यै-	for	-वाक्यै-
27	4	ऽप्रामाण्य-	,,	प्रामाण्य-
,,	,,	एव न	,,	एव
,,	7	-सम्मतत्वाच्च	,,	सम्मतम्
,,	10	बाधित-	to be corrected to	ऽबाधित-
,,	,,	-तत्वयोर्	,,	-त्वयोर्
,,	11	अत एव	,,	एवं
,,	18	-ज्ञाप्य-	,,	-व्याप्य-
,,	19	-वत्	,,	-वत
,,	23	एतत्-	,,	एतस्य (क—एटट)
28	7	-पदद्वय-	for	-पद-
,,	9	ऽभेदः	,,	भेदः
,,	12	तत्तद्-	,,	तद्-
,,	16	-विशिष्टे बोधकं	,,	-विशिष्टबोधक-
,,	19	-हरणस्य	,,	-हरणनिगमनयोः
,,	20	न्याया-(prabably also क)		-न्यथा-
29	2	अभाव-	,,	भाव-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

,,	4	मुख्यविशेष्यत्वस्य	,,	विशेष्यत्वस्य
,,	9–10	-स्थित्या तत्त्वानुपपत्तेः (क—oस्थितत्वातत्वा- नुपपत्तेः)	for	स्थितत्वानुपपत्तेः
,,	9 and13	-ध्य-	to be corrected to	ध्यि
,,	12	ऽभेद	for	भेद
,,	,,	ज्ञानजनकत्वम्	,,	जनकत्वम्
,,	14	इतरेभ्यो भेदे साध्ये	omitted	
,,	16	-जनकत्वस्य	for	-जनकस्य
,,	19	पचतीत्यत्र and पक्तेत्यादौ	omitted	
,,	21	इतरेभ्यो		,,
,,	22	-भिन्नाभेदस्य	for	-भेदाश्रयाभेदस्य
30	2	विशिष्य	,,	विशिष्टा
,,	4	नातिव्याप्तिः । प्रतिज्ञाया मेयवद्भेदस्य हेत्ववय- वेनाधारत्वादिना	for	-नाधारत्वादिना
,,	14	किञ्चिद्	,,	किन्तु
,,	15	जन्ये चैकैका	,,	जन्य एकैका
31	4	-नियोगो	,,	-नियोगे न
,,	5	-धान-	,,	-धा-
31	9	-नियोग इति	for	नियोगान्
,,	,,	-रोधात्	,,	-रोधेन
,,	20	चार्थः	,,	चार्थे
32	7	-द्व-	,,	-त्र-
,,	10-11	अपि वदन्ति	,,	आचार्यानुसारिणः
,,	13	तथा चा-	,,	तथा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

,,	14-15	स्वार्थको	,,	स्वार्थबोधको
,,	17	दृष्टान्तसमान-	,,	समान-
,,	19	असद्-	,,	सद्-
33	9	-दिकं	,,	-कं
,,	11	हेत्वन्वयानु-(also क)	for	हेतुत्वस्यानु-
,,	15	हेतुमत्त्वे	,,	हेतुमत्त्वेऽपि
,,	21	-संभवे	,,	-संभवेन
,,	22	अवगतं	,,	अनवगतं
34	7	-धर्मविशिष्टस्य	,,	-धर्मस्य च
,,	8	अन्यथार्थ-	,,	अन्यथायथार्थं
,,	9	इत्येव	,,	इत्यादि
,,	13	चै०—०वद्	omitted	
35	10	-भावौ तथा	for	-भावौ
,,	13	-त्यु- to be corrected to -यु-		
,,	16	तद्धर्मं	for	तद्धर्म-
,,	21	वारणाय साधन-	,,	वारणा साधारण-
,,	,,	तन्मुख्यविशेष्यकेत्यर्थकं added after इति		
36	2-3	लक्षण-	for	न लक्षणा-
,,	13	तेन तत्तत्	,,	तत्तत्
37	3	After-पर- is added:—वीप्सायाऽशेषमात्र-परत्वसंभवाच्च अस्तु वात्र एकयत्पदादेव तात्पर्यबलात्तल्लाभः (sic)		
,,	13-14	व्या०—च	omitted	
,,	19	-सिद्धयोऽसाध-(क—सिद्धायाऽसाध-)	for	-सिद्धायाः साध-
,,	21	The frist न तु	omitted	

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

38	2	किंच	omitted	
,,	15	स्थितेर्वाच्यत्वात्	for	-स्थितिर्वाच्या
,,	16	तथा च वीप्सां	,,	वीप्सां
,,	16-17	-ग्रहोऽस्तु	,,	-ग्रहाद्—०वात्
,,	18	धूम-	,,	धूमादि-
,,	,,	वह्नि-	,,	वह्न्यादि-
,,	19	After आहुः is added:—वस्तुत एकयत्पदमे-वादेशस्तात्पर्यग्राहक इति श्रूयमाणप्रथमपदादेव व्याप्तिधी (sic)		
38-39	19-8	तच्—०त्वात्	omitted.	
39	9-16	प्रत्यवाय०—विस्तरेण	omited.	
40	6	-साधर्म्यात्त-	for	-साधर्म्या-
,,	10	-वद्धि-	,,	-तद्धि-
,,	19-	इति लक्षणार्थः	,,	इत्यर्थः
40	20	Before व्याप्तिर् is added:—यद्वा उदाहर-णापेक्षव्याप्तिबोधकतया तथा च प्रकृतपक्षे सा-ध्यव्याप्यहेतुमत्तावोधकोऽवयव इत्यर्थः		
,,	21	तत्रा-	for	तथा-
41	6	-भावाभाववत्व-	,,	-भावाभावत्व-
,,	12	तद्व्याप्यधूमवान्	,,	तद्वान्
,,	,,	साध्यस्य तद्व्याप्यस्य वा	,,	साध्यव्याप्यस्य
,,	19	-देव	,,	-देरेव
42	6	प्रतिज्ञायाश्च	(Both क and ख)	
,,	13	-बोधको	for	-बोधो
43	5	चेह एतद्-	,,	चैतद्-
,,	10	-धर्मता-	,,	-धर्म-
,,	12	पूर्व	,,	पूर्व
,,	15-16	-ज्ञाप्य-	,,	-ज्ञापक-
,,	19-20	अयो०—०वत्	omitted	

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS.

Edited by

GOPINATH KAVIRAJ, M. A.

No. 1—The Kiraṇāvālī Bhāskara, a Commentary on Udayana's Kiraṇāvalī, Dravya section, by Padmanābha Miśra.

Ed. with Introduction and Index by Gopinath Kaviraj, M.A. Rs. 1–12

No. 2—The Advaita Chintāmaṇi, by Raṅgoji Bhaṭṭa, Ed. with Introduction etc. by Nārâyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1–12

No. 3—The Vedānta Kalpalatikā, by Madhusūdana Sarasvatī.

Edited with Introduction etc. by Rāmājñā Pāṇḍeya Vyākaraṇāchārya. Rs. 1–12

No. 4—The Kusumāñjali Bodhanī, a Commentary on Udayana's Theistic Tract, Nyāya Kusumāñjali, by Varadarāja.

Ed. with Introduction etc. by Gopinath Kaviraj, M.A, Rs. 2–0

No. 5—The Rasasāra, a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhaṭṭa Vādīndra.

Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1–4

No. 6—(Part I)–The Bhāvanā Viveka by Maṇḍana Miśra, with a Commentary by Bhaṭṭa Umbeka.

Ed. with Introduction etc. by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0–12

No. 6–(Part II)—Ditto Ditto Rs. 0–12

No. 7–(Part I)–Yoginīhṛdaya dīpikā, by Amṛtānanda Nātha, being a Commentary on Yoginīhṛdaya, a part of Vāmakeśvara Tantra.

Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1–4

No 7—(Part II) Ditto Rs. 1–8

No. 8—The Kāvyaḍākinī, by Gaṅgānanda Kavīndra.

Ed. with Introduction etc. by Jagannātha S'āstri Hoshing Sāhityopādhyāya, Rs. 0–10–6

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

No. 9—(Part 1)–The Bhakti Chandrikā,a Commentary on S'āṇḍilya's Bhaktisūtras, by Nārāyaṇa Tīrtha.
Ed.with a PrefatoryNote by Gopinath Kaviraj,M.A.
Rs. 0–15

No. 10–(Part I)–The Siddhāntaratna, by Baladeva Vidyābhūṣaṇa.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A.Rs.1–2

No. 10–(Part–II)–The Siddhāntaratna by Baladeva Vidyābhūṣaṇa.
Ed. with Introduction by Gopinath Kaviraj, M. A.

No. 11–The S'rī Vidyā Ratna Sūtras, by Gauḍapāda, with a Commentary by Saṅkarāraṇya.
Ed. with Introduction etc. by Nārāyaṇa S'āstrī Khiste Sāhityāchārya. Rs. 0–9

No. 12–The Rasapradīpa, by Prabhākara Bhaṭṭa.
Ed. with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1–2

No. 13–The Siddhasiddhānta Saṅgraha, by Balabhadra.
Ed, with Introduction by Gopinath Kaviraj, M. A. Rs. 0–14

No. 14–The Triveṇikā, by Āśādhara Bhaṭṭa.
Ed. with Introduction by Baṭukaṇātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0–14

No. 15–(Part 1)–The Tripurārahasya. (Jñāna Khaṇḍa)
Ed.with a Prefatory Note by Gopinath Kaviraj,M.A.
Rs.0–14

No. 15–(Part–II)–The Tripurārahasya (Jñānakhaṇḍa) Ed. by Gopinath Kaviraj, M. A.

No. 16–The Kāvya Vilāsa, by Chiraṅjīva Bhaṭṭāchārya.
Ed. with Introduction etc. by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 1–2

No. 17–The Nyāya Kalikā, by Bhaṭṭa Jayanta.
Ed. with Introduction by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0–14

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

No. 18–(Part I)–The Gorakṣa siddhānta Saṅgraha.

Ed. with a Prefatory Note by Gopinath Kaviraj, M. A. Rs, 0–14

No. 19–(Part. I)–The Prākṛita Prakāśa by Vararuchi with the Prākṛita Sañjīvanī by Vasantarāja and the Subodhinī by Sadānanda.

Ed. with Prefatory note etc. by Batuk Nath S'armā, M. A. and Baladeva Upādhyāya, M. A.

No. 19–(Part.II) Ditto Ditto

No. 20–The Mānsatattvaviveka by Viśvanātha Nyāyapañchānana Bhaṭṭāchārya.

Edited with Introduction etc. by P. Jagannatha S'āstri Hoshing Sāhityopādhyāya, Sādholāl Research Scholar, Sanskrit College Benares, with a Foreword by Pandit Gopi-Nath Kavirāja, M. A., Principal, Government Sanskrit College, Benares.

No. 21–(Part I) The Nyāya Siddhānta Mālā by Jayarāma Nyāya Pañchanana Bhaṭṭāchārya.

Edited with Introduction etc. by Mangal Deva S'āstrī M. A. D., Phil. (Oxon), Librarian, Government Sanskrit Library, Sarasvati Bhavana, Benares.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES:

Edited by

GOPINATH KAVIRAJ, M. A.

Vol. I—

(a) Studies in Hindu Law (1): its evolution, by Gaṅgānātha Jhā.

(b) The View point of Nyāya Vaiśeṣika Philosophy, by Gopi nathKaviraj.

(c) Nirmāṇa Kāya, by Gopinath Kaviraj. Rs. 5

Vol. II—

(a) Paraśurāma Miśra ALIAS Vāṇī Rasāla Rāya, by Gopinath Kaviraj.

(b) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(c) Studies in Hindu Law (2):—its sources, by Gaṅgānāth Jha.

(d) A New Bhakti Sūtra, by Gopinath Kaviraj.

(e) The System of Chakras according to Gorakṣa nātha, by Gopinath Kaviraj.

(f) Theism in Ancient India, by Gopinath Kaviraj.

(g) Hindu Poetics, by Batuka nātha S'armā.

(h) A Seventeenth Century Astrolabe, by Padmākara Dvivedi.

(i) Some aspects of Vīra S'aiva Philosophy, by Gopinath Kaviraj

(j) Nyāya Kusumāñjali (English Translation), by Gopinath Kaviraj.

(k) The Definition of Poetry, by Nārāyaṇā S'āstri Khiste.

(l) Sondala Upādhyāya, by Gopinath Kaviraj. Rs. 5

Vol. III—

(a) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(b) Studies in Hindu Law (3): Judicial Procedure: by Gaṅgā nātha Jha.

(c) Theism Ancient India, by Gopinath Kaviraj.

(d) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(e) Naiṣadha and S'rī Harṣa by Nīlakamala Bhaṭṭāchārya.

(f) Indian Dramaturgy, by P. N. Pātankar. Rs. 5

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Vol. IV—

(a) Studies in Hindu Law (4): Judicial Procedure: by Gaṅgānātha Jhā.

(b) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(c) Analysis of the Contents of the Rgveda Prātiśākhya, by Maṅgala Deva S'āstrī.

(d) Nārāyaṇa's Gaṇita kaumudī, by Padmākara Dvivedi.

(e) Food and Drink in the Rāmāyanic Age, by Manmatha nātha Roy

(f) Satkāryavāda: Causality in Sāṅkhya, by Gopinath Kaviraj.

(g) Discipline by Consequences, by G. L. Sinha.

(h) History of the origin and expansion of the Aryans by A. C. Ganguly.

(i) Punishments in Ancient Indian Schools, by G.L. Sinha. Rs. 5

Vol. V—

(a) Ancient Home of the Aryans and their migration to India, by A. C. Ganguly.

(b) A Satrap Coin, by Shyamalal Mehr.

(c) An Estimate of the Civilisation of the Vānaras as depicted in the Rāmāyaṇa, by Manmatha nātha Roy.

(d) A Comparison of the Contents of Rgveda, Vājasaneya, Taittirīya & Atharvaveda Prātiśākhyas, by Maṅgala Deva Sāstri.

(e) Formal Training and the Ancient Indian Thought, by G.L. Sinha.

(f) History and Bibliography of Nyāya Vais'eṣika Literature, by Gopinath Kavirāj.

(g) A Descriptive Index to the names in the Rāmāyaṇa, by Manmatha nāth Roy.

(i) Notes and Queries (1) Virgin Worship, by Gopinath Kaviraj.

Vol. VI—(In progress)

(a) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob..

(b) Some Aspects of the History and Doctrines of the Nāthas, by Gopinath Kaviraj.

(c) Studies in Hindu Law (5): Evidence, by Ganganatha Jhā.

To be had of

The Superintendent, Government Press,

ALLAHABAD, U. P. (INDIA).



CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

DATE DUE

Class No. _____ Book No. _____

Accession No. 1189

This book should be returned to the Library on the date last stamped. A fine of 0.6 nP. will be charged for each day the book is kept over time.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE